X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 8

Title BHAGAVANTA-BHASKARA.
('SRADDHA-MAYUKHA)

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 8 Subject: Dharmaśāstra

Title: Śrāddha Mayūkha of Bhagavant Bhāskara

Author: Nīlakaṇṭha Bhaṭṭa Scribe: —

Date of the work: c1640 AC Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.5" by 5.5" Extent: 113 folios.

Language: Sanskrit. Script: Devanāgarī

Remarks: Complete.

श्राम.
१

॥श्रीगणेशाय नमः॥ ॥श्रीरविर्जयति॥ ॥तिर्यग्मयूखं प्रतिपाद्य सम्यग्गराद्यधामायगिरामगम्यं॥ श्री
शंकरस्यात्मजनीजकं श्राद्धस्य कृत्यं विवृणोति सर्वं॥१॥ प्रतारकैरादृतमत्र किंचिन्मयातु निर्मूलतया
तदुज्झितं॥ उक्तोक्तितालो न हि तेन काचित् खपुष्पदानापचितिर्निषिध्यते॥ ॥तत्र तावद्द्रव्यको विप्रस्वीकारांग
कोद्रव्यत्यागः श्राद्धं॥ जीवश्राद्धे देवश्राद्धे च तत्त्यागे गौणं कौंड्याप्यग्निहोत्रपदवत्॥ विप्रकी स्वीकारत्वो
क्तात्पणि निवृत्तिः॥ यत्तु केचित्यागमात्रादेव तर्पणनिवृत्तिमाहुः॥ द्रव्यं देवतानेंद्रऊर्ध्वे ध्वरद्रव्याधार
नाधारयतीत्यादि यागकल्पनाया अभावप्रपकत्वात्॥ न मम मेत्यभिलापायाः परेनाभिव्याचारणाभावात्॥
मंत्रेव यागाग्निहोत्रादावभिलापाचारस्तत्रैव तादृशमंत्रकल्प्यनुमानं तत्र वत्त्यागस्तु यानसः॥ सर्वत्राप्य
वसिष्टः न च द्रव्यदेवताभावेन द्रव्यदेवतासंयोगाभावः॥ देवतास्त यथितीत्यागाश्वलायनादिस्तत्रैव
तापदेन तत्समर्पणात्॥ पंगकत्वोक्ता च विप्रस्वीकृते श्राद्धस्वरूपघटकतात्यैवैत्य ते तेन तत्र भावेपिध
नसिद्धिरविदत्ता पिंडदानस्य च प्रधान्यसिद्धिः॥ नान्यथानस्य विप्रस्वीकारणं तत्राभावेन प्राधान्यं नस्या

राम.

त्॥ एतेन विप्रस्वीकारांतो द्रव्यत्यागः श्राद्धं पिंडदानांगीकरणयोश्च तदंगत्वमिति विरुद्धं पलयंतः केचिद
पास्ताः॥ अत एवापस्तंबसूत्रेपि गोदेवतावाल्मणस्त्वाहवनीयार्थ इति विप्रस्वीकृतेस्य द्रव्यप्रतिपत्तित्वमा
वहनीयाधिकरणकहोमवदुक्तं संगच्छते॥ यत्तु ब्रह्मांडे॥ देशकाले च पात्रे च श्राद्धया विधिना च यत्॥ विप्रे
तु देत्रपवित्रेभ्योदत्तं श्राद्धमुदाहृतमिति तोत्यां प्रतिपादकवां तेन दानस्वरूपता पिवृत्यजेत्त्यादिस्वरत्यंतरे
च यागस्वरूपताख्यवक्तासा गौणेति केचित्॥ यागव्याप्यत्वेपि श्राद्धस्य नकाचित्क्षति॥ गौणपांमानाभावा
त्॥ श्राद्धे च पितृद्देशकान्नत्यागरूपत्वाद्द्विजभोजनपिंडदानयोरेव प्रधान्यं तादृशान्नत्यागस्य फलसंबंधि
त्वेन तत्र तत्रैव वक्ष्यमाणत्वात्॥ एवमेवकपर्दिस्वामिप्रभृतयः॥ यत्तु रेरगीकरणमपि प्रधानमुक्तं त
न्मूलंमृग्यं॥ यत्तु प्राच्या केचित्संक्रांत्यादिश्राद्धेषु पिंडनिषेधः॥ पर्युदासो वा प्राप्तिमपेक्ष्य तेन स तत्रिदे
शेन॥ स चांगतामेव न प्रमान स्यात्तत्र पिंडदानमंगमित्याहुः॥ तन्न॥ तद्यातिदेशिकेव प्राप्तिनिषेधस्य प
र्युदासस्य चोपजीव्या॥ प्रधानत्वे हि तस्यापि श्राद्धपदाशक्यत्वात्तद्विधिनैव प्राप्ते निषेधपर्युदासोपप

समव.
श्राम.
२

ते॥अथतत्क्रतुत्वात्दर्शपिंडप्रधानं॥यत्तुकर्कस्तुपापिन॥पिंडदानमेवप्रधानंनान्योद्देश्यत्यागः॥नदर्शपिनपितु
देवयकान्नत्यागस्यापिफलसंबंधाविशेषात्॥निषिद्धपिंडपर्युदस्तपिंडकसंक्रान्त्यादिश्राद्धेप्रधानाभावे
नांगमात्रानुष्ठानप्रसंगादितिदिक्॥तत्रश्राद्धंपार्वणमेकोद्दिष्टंच॥पार्वणंचदर्शश्राद्धमेवपर्वणिभवमि
तियोगात्॥नचपर्वशब्दस्यसंक्रान्त्यादावपिसत्त्वात्तन्निमित्तकेश्राद्धेतथापूर्णिमाश्राद्धेतथाऽमावास्या
यांविशेषणेतिनिगमवचनेनकृष्णपक्षश्राद्धस्यावास्याख्यपर्वयोगात्तत्राप्यतिप्रसक्तोयोगइतिवाच्यं
अमावास्यायांयत्क्रियतेतत्पार्वणमुदाहृतमितिस्मृतिविरोधेनयोगरूढत्वात्॥संक्रान्त्यादौपर्वशब्दस्य
गौणत्वाच्च॥एकमुद्दिश्ययच्छ्राद्धंमेकोद्दिष्टंप्रचक्षते॥त्रीनुद्दिश्यतुयत्तद्धिपार्वणंमुनयोविदुरितिकल्पएवव
चपितृत्र्युद्देशकश्राद्धमात्रेपार्वणशब्दःकौरपायनहोमेमासमग्निहोत्रंजुहोतीत्यग्निहोत्रशब्दवद्गौणः
॥नचत्रीनुद्दिश्यतुयत्तद्धीतस्यरूढिबोधकत्वेवोवतिवाच्यं॥दार्शिकेप्यनेनैवरूढिसिद्धेरमावास्यायामित्य
स्यानर्थक्यप्रसंगात्॥अतःपार्वणशब्दोदार्शिकस्यैवनामधेयमिति॥दर्शश्राद्धप्रकरणएवचमन्वादिस्मृ

राम.
२

तिषुधर्मपाठात्॥तदेवप्रकृतिः॥अन्येषुतुधर्मानुक्तेर्विकृतित्वं॥आश्वलायनसूत्रानुसारिणांतुअथवातःपार्व
णश्राद्धेकाम्यआभ्युदयिकएकोद्दिष्टेवेतितत्सूत्रेणचत्वारिश्राद्धानिप्रकम्यधर्माम्नानात्चतुर्णामपिसम
नविधानताकात्यायनसूत्रेवसत्यापाठस्मृत्यानुसारिणांकृष्णपक्षश्राद्धंप्रकृतिः॥तत्रैवधर्माम्नानात्॥तद
पिप्रकृतित्वमष्टकादीन्प्रत्येवयत्रतस्यामासिश्राद्धेनकल्पोव्याख्यातइत्यापस्तंबादिसूत्रामस्तिन्याये
नसर्वश्राद्धप्रकृतित्वेप्राप्तेएवमादिसूत्रस्यपरिसंख्यार्थत्वात्॥एतत्सूत्रपरिसंख्यातानांतुवार्षिकश्राद्धा
दीनांदर्शश्राद्धविकृतित्वमितिनिर्णीयमयाविस्तरेणमासिश्राद्धेप्रकृतौ॥अतोवार्षिकादिश्राद्धेतरेषुचे
दनालिंगेनपूर्वोक्तकएववचनोक्तपार्वणनाम्नासपिंडीकरणात्पूर्वमेकोद्दिष्टंसुतःपितुः॥ऊर्ध्वंपार्वण
वत्कुर्यात्स्वित्यष्टमितरेणात्वितिजोगाक्षिवचनेवादार्शिकोतिदेशः॥श्राद्धमेदानाहयाज्ञवल्क्यः॥अमावा
स्याष्टकावृद्धिःकृष्णपक्षोयनद्वयं॥द्रव्यब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः॥व्यतीपातोगजच्छायाग्रह
णंचंद्रसूर्ययोः॥श्राद्धंप्रतिरुचिश्चैवश्राद्धकालाःप्रकीर्तिताः॥इति॥अत्रचश्राद्धानुवादेनकालविधिः॥या

श्राम॰ २

ज्वल्कास्मृतौ श्राद्धस्य वचनांतरेण प्राप्तेः॥ आवश्यकस्यास्यां स्मृतौ श्राद्धस्य विधिरनुवादो वा॥ अन्यथेतिक
र्तव्यतामात्रं वैयर्थ्यप्रसंगात्॥ अतो यामावास्यादिविशिष्टश्राद्धविधायकान्येतावंति वाक्यानि कल्प्यंते॥ तत्रा
मावास्यानिर्णतास्मभयमयूखे॥ अष्टकादेमं तत्रिस्त्रिरयो श्वतुर्णां परपक्षाणामष्टमीष्वष्टका इत्याश्वला
यनोक्ताश्चतस्रः॥ नाढकस्ताष्टमी पंचमी॥ तथा च पाद्मे॥ वासुनामा पिता कन्यां त्रय्याख्यां पानुज ग्राह्य न साष्टका
जो नोस्मं ने तु कं शेष्टपंचाष्टकास्वयं पितृलोके न विष्णुस्मि॥ आयुरारोग्यमैश्वर्यं सर्वकामफलप्रदेति॥ त
त्राश्वक्लौ तु कल्पमाद्राश्वलायनः॥ अप्यनुहोपवसमाहरेद्मिना वा कक्षमुपोषेदेषा मष्टकेति नत्वे वा
नष्टकस्यादिति॥ यव समार्ईत्तणं॥ कर्तृत्तु कंतरणं॥ उपोषेद्देतन्॥ ॥अथान्वष्टका॥ ॥अष्टकायुक्ताहाश्व
लायनः॥ अपरेद्युरन्वष्टकामिति॥ अत्र नवम्यां अपराह्णव्यापिन्यां न निर्णयः॥ नस्या निमित्तत्वाश्रुतेः॥ सर्व
त्र स्मृतिषु त्रिरेद्युर्मध्ये तद्व्यष्टको नरदिनस्यैवान्वष्टकानिमित्ततया श्रवणात्॥ कात्यायनः॥ अन्वष्ट
कासु नवभिः पिंडैः श्राद्धमुदाहृतः॥ पित्रादिमातृमध्ये च ततो मातामहांतिकमिति॥ आग्नेये॥ अन्वष्टका

राम॰ २

सुहृदो च गयायां च दत्तये द्विनि॥ अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सहेति॥ हेमाद्रौ छागलेयः॥ केवला
स्तु त्वपेकाय हि हावाश्रीभ्रकीर्तितः॥ अन्वष्टकासु मध्यस्थानो त्याकायस्किमातरमिति॥ तन्नैव ब्राह्मे॥
पितृभ्यः प्रथमं दद्यामातृभ्यस्तदनंतरं॥ ततो मातामहेभ्यश्चेत्यान्वष्टको क्रमः स्मृत इति॥ दीपिकायां तु मा
तृयजनं त्वन्यष्टकास्यादित इत्युक्तं॥ तज्जीवपितृकविषयं तस्य पितृपार्वणाभावादिति कश्चित्॥ तन्नु छं
कमानुपपत्ते॥ व्याख्याने देनतु व्यवस्थायुक्तात त्राप्याश्वलायनादीनां पितृपूर्वकं॥ तत्स्त्रे तयास्ता नात्
अन्येषां तु मातृपूर्वकं अत्र सुवासिन्यपि भोज्या नतु रश्मेरतानारी सहवातेन या मृता तत्स्थाप्याने निपु
जित चिंवे स्तद सुवासिनो मितिस्मृतिः॥ इदं च नित्यं अष्टकान्वष्टकास्विवस्त्यैवचन्त्यो व्रम॥ एतानि श्रा
द्धकालानि नित्यानाह प्रजापतिः॥ श्राद्धमेतेष कुर्वाणो नरकं प्रतिपद्यत इति हेमाद्रौ विष्णुधर्मोत्तरात्॥ अ
त एवेदं स्वतंत्र प्रधानेना ष्टकांगं॥ पूर्वैव श्राद्धं त्वष्टकांगं॥ फलवत्संनिधावफलं तदंगमिति न्यायात्॥ ए
त एव पितामहचरणा नामप्याद्राग्रयः॥ इदं च श्रद्धानुपेताभ्याम पिकायमिति वक्ष्यते धिकारि निर्णये जी

॥

श्राम·
४

वन्यिन्नापीदंकार्यं॥अन्वष्टक्यंगयायांतौसत्यांयश्चमृतेहनि॥मातुःश्राद्धंसुतःकुर्यात्पितर्यपिचजीवति॥ति
मैत्रायणीयपरिशिष्टात्॥अकरणेप्रायश्चित्तमस्मिन्विधाने॥एतिद्दृष्टनिर्णयेमंत्रंत्रतवारंतुतद्दिने॥आन
ष्टक्यंयदाम्हत्यंसंपूर्णंयातिसर्वथेति॥नांदीपदान्वष्टकाश्राद्धमध्यावर्षकं॥सर्वसामेवमातॄणांश्राद्धं
कन्यागतेरवौ॥नवम्यांद्विपदानव्यंब्रह्मलच्छ्ववरायतइतिस्मृते॥अत्रसर्वसामितिवचनात्सपत्नमा
तुरपिश्राद्धं॥तत्रमातृसपत्नमात्रोर्देवतात्वेविशेषेनारायणवृत्तौतूक्तः॥अनेकामातरोयस्यश्राद्धेच
परपक्षिके॥अर्घ्यदानंपृथक्कुर्यात्पिंडमेकंतुनिर्वपेत्॥द्वयोर्बहूनांचनामैकोद्विवचनांतंबहुवचनां
तंचेतिश्राद्धेआन्वष्टक्ये॥यत्तुपरंतितन्मिश्रपक्षेनवमात्पुत्पानाद्यपदेदिष्या॥चत्वारःपार्वणाःकार्याःपित
पत्नेमनांपिनिरितितन्नाकरस्विस्मःइदंचसधवायाएवमातुर्मरणेनवतीतिकेचित्॥वस्तुतस्तुअविशे
षाद्विधवायाअपिमृतानवति॥यत्तुश्राद्धंनवम्यांकुर्यात्स्मृते॥भर्तुरिज्येष्टनेइतिवचस्तदनाकरं॥एतत्र
मातृवत्याद्ध्याद्धवरदघिशेषाजीवत्पितृकेणापिसपिंडंकार्यं॥यत्तुजीवत्पितृकनिर्णयेमंडनंपिंडदा

राम·
४

नंचवेतकर्मचसर्वशःनजीवत्पितृकःकुर्यात्गुणाविंपितिरेवचेतिदत्तवाक्येनलिखितंदत्तमस्त्रैनिबंधांत
रेचादर्शनादनाकरमित्यस्करप्रसक्तानुप्रसक्तंप्रकृतंयात्तवक्कावचोव्याख्यामनुसरामः॥वृद्धिपुत्रजन्मए
तानिचश्राद्धानिनित्यानि॥अमावास्याव्यतीपातपौर्णमास्यष्टकासुच॥विद्वन्श्राद्धमकुर्वाणःप्रायश्चि
त्तीयतेतुसइतिपितामहोक्तेः॥श्राद्धंकुर्यादिवप्रंपतुप्रमीतपितृकोद्विजः॥इंदुक्षयेमासिमासिप्रद्धोप्रत्यत
मेवचेतिलौगाक्षिवाक्याच्चाक्रसःसर्वमासायःननुमाद्यपदस्यैवअयनद्वयमकर्कटसंक्रमणेविषु
वतुलामेषसंक्रमणे॥संक्रमादयनविषुवतोपृथग्निर्देशःफलम्स्यपार्थः॥दव्यंपायसादि॥ब्राह्मणोव
क्ष्यमाणलक्षणःतयोसंपत्तीइतिद्विवचनांतःपाठइतिकेचित्॥एकवचनांतःपाठः॥द्रव्यब्राह्मण
संपत्तिर्यस्मिन्कालइतिवक्तुर्बुद्धिरितिमाधवस्मृतिचंद्रिकाकारौ॥द्रव्यमित्यसमस्तमितिमितांतं
यांव्यतीपातःप्रसिद्धोयोगःश्रवणाश्विधनिष्ठाद्यानागदैवतमस्तके॥यद्यमारविवारेणव्यतीपातःस
उच्यतइतिवृद्धमनुक्तोवा॥नागदैवतमश्लेषा॥मस्तकंमृगशिरः॥मस्तकेप्रथमचरणेतथाचंश्रवण

श्रा.म. ५

दिपंचानां त्रयमपादइति हेमाद्रौ ग्रन्थांतरे तु पि॥ पंचाननस्थौ गुरुभूमिपुत्रौ मेषे रविः स्याद्यदि शुक्लप
क्षे॥ पाशाभिधाना करभेणयुक्ता तिथिर्व्यतीपात इतीह योगः॥ पंचानन सिंह॥ पाशाभिधाना द्वादशी॥ क
रभं हस्तः॥ गजछायान्वपराकें वायुपुराणे॥ हंसे हंसास्थिते याऽतु मघायुक्ता त्रयोदशी॥ तिथि वैवस्वती
नाम सा छाया कुंजरस्य तु॥ इति॥ स्कांदे पदे तु पितृदैवत्ये हंसश्चैव करे स्थितः॥ याम्या तिथिर्भवेत्सा हि गज
छाया प्रकीर्तिता॥ इति॥ पितृदैवत्यं मघा हंसः सूर्यः करो हस्तः॥ याम्या तिथिस्त्रयोदशी॥ तथा हंसस्थिते या
तु अथ मा वा स्यात्करान्विता॥ सा ज्ञेया कुंजरछाया इति बौधायनोऽब्रवीत्॥ हंसः सूर्यस्तद्देवताकत्वाद्धस्त न
क्षत्रमपि॥ चंद्रसूर्ययोर्हस्तस्थयोरिति फलितोऽर्थ इति हेमाद्रौ॥ हस्तिछायेति स्मृतिचंद्रिकायां॥ एतद्वे
व पितॄणामयनं यद्धस्तिश्राद्धं तस्मात् छायायां श्राद्धं दद्यादिति कारकोक्तेः॥ गजछायासु कुर्वीत कर्णव्यज
नवीजितेति भारतोक्तेः॥ स्वश्राद्धकालाप्रकीर्तिता इति गजछायाख्याहितकालेयद्ग्रहणा रविराहुग्रहणंस्य
त्काले॥ विरश्मस्यरश्मिमयेन्त्वपिति पितरस्तथा॥ मनुष्या मध्यकाले तु रात्रसा इति वृद्धवसिष्ठोक्तेः॥ रा.म. ५

श्राद्धं प्रति रविर्छायाश्राद्धकालाः प्रकीर्तिताः॥ इति न परिसंख्या अन्येषामपि कालानां श्राद्धानुवादेन विधाना
त्॥ तत्पाच ब्राह्मे॥ आषाढ्याममकाऽर्तिक्यां माघ्यां मन्वंतरादिषु युगादिषु चतुःस्वपि जन्मर्क्षे ग्रहपीडिते॥ कृ
ष्टपराजिते पक्षे श्राद्धं कुर्वीत यत्नतः॥ मार्गशीर्षे च पौषे च माघे प्रौष्ठे च फाल्गुने॥ कृष्णपक्षेषु वैधुरान्क
तयाष्टमीति॥ तिस्रोऽष्टकास्तासु श्राद्धं प्रकुर्वीत पार्वणमिति॥ युगादयो विष्णुपुराणे॥ वैशाखमासस्य तु
या तृतीया नवम्यसौ कार्तिकशुक्लपक्षे॥ नभस्यमासस्य तमिस्रपक्षे त्रयोदशी पंचदशी च माघे॥ माघे
पंचदशी अमावास्या हि शुक्ले द्वितयाक्रमेऽस्य इति वक्ष्यमाणवचनात् देवलः॥ तृतीया रोहिणीयुक्ता वैशाखस्य
सिता तु या॥ मघाभिः सहिता कृष्णा नभस्ये तु त्रयोदशी॥ नवमी कार्तिकस्यापि शुक्ला तारकसंयुता तथा ते॥
नैव कृष्णेन माघे पंचदशी युता॥ युगादयः स्मृता ह्येता दत्तस्याक्षयकारकाः॥ इति॥ इह च तत्र नक्षत्रयोगाद्यु
गादिषु शुक्लादिरेव मासो ग्राह्यः॥ कृष्णादिपक्षे तद्योगाभावात्॥ यत्तु ब्रह्मपुराणे॥ माघस्य पौर्णमास्यां तु
घोरं कलियुगमित्युक्तं तत्कल्पभेदेन ज्ञेयं॥ नारदीये॥ द्वे शुक्ले द्वे तथा कृष्णे युगादिकवयो विदुः॥ शुक्ले

श्रा॰म॰
६

पूर्वाह्णिके याश्चैकभक्ते चैवापराह्णिके ॥ अस्मिंश्चगोऽन्नमिति हिरण्यवस्त्रदानेन सर्वं प्रविहाय पापं ॥ अमरत्वमिंद्र
स्यमुक्तत्वमेति मर्त्याधिपत्यं जनते मनुष्यः ॥ मात्स्ये ॥ मन्वादयः ॥ अश्वयुक्शुक्लनवमी कार्त्तिके द्वादशी
तथा ॥ तृतीया चैव माघस्य तथा भाद्रपदस्य च ॥ फाल्गुनस्य त्वमावास्या पुष्यस्यैकादशी सिता ॥ आषाढस्या
पि दशमी माघमासस्य सप्तमी ॥ श्रावणस्याष्टमी कृष्णा तथाषाढी च पूर्णिमा ॥ कार्त्तिकी फाल्गुनी चैत्री ज्ये
ष्ठी पंचदशी सिता ॥ मन्वंतरादयश्चैता दत्तस्याक्षयकारकाः ॥ अत्र विशेषा निर्दिष्टाः शुक्लातिथियास्ता ॥
नाद्दकल्प्याः ॥ ग्रहोपरागे च सुते च जाते पित्र्ये गयायामपमयनद्वये तु ॥ नित्यं च शंखे च तथैव पद्मे द
त्तं न वै निष्कसहस्रतुल्यमिति नित्यं न वेदत्तमित्यन्वयेन नित्यनैमित्तिके त्रिकायां पित्र्ये मघा ॥ सा च मदालप
स्याच्छंखो माघा स्यात्पद्मोऽष्टका ॥ तथा च स एव ॥ शंखं खबाकूरमावास्यां ह्लाणसोमां द्विजोत्तमा ॥ अष्टका
सु न वेत्यद्यतनदत्तं तथाक्षयमिति ॥ यदा विष्टिर्व्यतीपातो नानुवारं तथैव च पद्मकं नाम तत्प्रोक्तमयना
नुवत्तुगुणमिति शंखोक्तो वा पद्मः ॥ देवलः ॥ इंदुक्षयो गजच्छाया मन्वादिषु युगादिषु ॥ एते कोऽष्टैःमनु हि

श्रा॰म॰
६

शापि कृष्णां पितृवर्द्धन इति चतुर्दश्या मिन्नासु दद्यात् कृष्णपक्षगासु तिथिषु क्रमात्फलान्याह याज्ञवल्क्यः ॥ कन्यां
कन्यावेदिनश्च पशून्वै सत्सुतानपि ॥ द्यूतं कृषिं च वाणिज्यं तथैकद्विशफानपि ॥ ब्रह्मवर्चस्विनः पुत्रान्स्व
र्णरौप्ये सकुप्यति ॥ ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा ॥ प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतु
र्दशीं ॥ शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदापयेदिति ॥ कन्यावेदिनो जामातरः ॥ द्यूतं तत्र विजयः कुप्यं ताम्रादि
हेमाद्रौ नागरखंडे ॥ अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा ॥ उपसर्गमृतानां च विषमृत्युमुपेयुषां ॥ व
ह्निना च प्रदग्धानां जलमृत्युमुपेयुषां ॥ सर्पव्याघ्राहतानां च शृंगाद्युद्बंधनैरपि ॥ तेषां श्राद्धं प्रकर्त्तव्यं चतु
र्दश्यां नराधिप ॥ ब्रह्मपुराणे ॥ वानपितरो घास्मृताः शस्त्रेण वा हता ॥ तेन कार्यं चतुर्दश्यां तेषां तृप्ती
मभीप्सता ॥ पैठीनसिः ॥ हतानां दृष्टलोहेन विद्युज्ज्वालाविषाग्निभिः नखिदंष्ट्रिविपन्नानामेषा शस्ता चतुर्द
शीति ॥ मरीचिः ॥ विषशस्त्रश्वापदादितिर्यग्ब्राह्मणघातिनां ॥ चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हि
तेति ॥ विषादिभिर्घातो येषां ते घातिनः ॥ यत्तु शाकटायनेनोक्तं ॥ जलाग्निना विपन्नानां संन्यासे वा गृहे प

श्रा·म·
७

षि॥ श्राद्धं कुर्वन्ति तेषां वै वर्जयित्वा चतुर्दशीमिति॥ तत्रैव धर्मस्तु परं॥ ज्ञातिश्रैष्ठ्यं न यो दत्तं चतुर्दश्यां तु सुप्रजाग्य
प्राप्नेपितरस्तस्य ये वै शस्त्रहतारणे॥ इति सौमंतवमस्य वै धर्मतिविषये॥ अत्र कल्पतरौ दशम्यादौ वर्ज
यित्वा चतुर्दशीमिति मनूक्ते चतुर्दशीवर्जनं दशमीमारभ्य श्राद्धानुष्ठाने ज्ञेयं॥ अमावास्ये माणमहाल
यश्राद्धगताषोडशसंख्याव्याहन्येत॥ अतएव न तस्यापरपक्षे तु श्राद्धं कार्यं दिने दिने॥ नैव नंदादिवर्ज्या
स्यानैव वर्ज्यं चतुर्दशीति॥ कार्ष्णाजिनिवचोपि संगच्छत इति माधवाचार्यः॥ तातचरणास्तु शाकल्येनतुदत्ता
पि वै तेभ्यस्तु त्रघटीयत इति॥ इतरदेवतावादे नशस्त्रहतानां देवतात्वविधानात्तदभावे लुप्यते॥ यथा सुर्दे
शे प्राकृतत्वेनाबाधादेवतांतरस्य चाविधानादुपांशुयाजः॥ मानवकार्ष्णाजिनी येऽपि शस्त्रहतपितृकं
त्रस्यैव संगच्छेते॥ मानवे दशम्यादावित्यत्रापि परेन पक्षांतरगमनमपि सहणं॥ जीवत्पितृकाजीवत्पितृक
मातामहांतिथिन्यु न प्रतिपन्नतश्चोद्देशि वशस्त्रहतशस्त्रमृतपितृकत्वमित्याधिकारिकत्वाद्वैधेवश्रा
द्धगताषोडशसंख्योपपद्यत इति॥ अतो देवताभावे चतुर्दश्यां श्राद्धं लुप्यत इति युक्तमुत्पश्यामि॥ एतेन च
रामः
७

र्दश्यां शस्त्रहतेभ्य इति देवतानियमोपि सिध्यति॥ न च चतुर्दशी कालनियमः॥ अन्येषां तु विगर्हितमिति पू
र्वोक्तिमरीचिवचनात्॥ अतोऽस्मिन्नपि दिने शस्त्रहतानामशस्त्रहतानां च न वस्त्वेव श्राद्धं॥ इदं चैकोद्दिष्टमे
व कार्यं न पार्वणं॥ समत्वमागतस्यापि तुः शस्त्रहतस्य वै॥ एकोद्दिष्टं सुतैः कार्यं चतुर्दश्यां महालये इति सुम
न्तूक्तेः॥ समत्वमागतस्य कृतसपिंडनस्येत्यर्थः॥ पित्रादित्रयं द्वयो शस्त्रादिना मृता वेकोद्दिष्टद्वयं कार्यं
एकस्मिन्द्वयोर्वैकोद्दिष्टविधिरिति स्मृतेः॥ अथैकस्मिन्द्वयोर्वे सुत्रापि त्रारिषु त्रिषु पित्रादिषु शस्त्रहतेषु पार्व
णमेव॥ अत्र माधवदेवस्वामि प्रभृतयः॥ एकस्मिन्द्वयोरित्यस्य यथाकृतत्वेवाक्यनेहापत्त्यैव तस्योपल
क्षणत्वेन त्रिषु पितृशस्त्रहतेष्वेकोद्दिष्टत्रयमेव कार्यं शस्त्रहतनिमित्ते एकोद्दिष्टविधिमात्रपरत्वाद्वाक्यस्य।
एकस्मिन्द्वयोरिति तु एकं हणिते द्वौ हणीते इत्यादिवदनुवाद इत्याहुः॥ वस्तुतस्तु शस्त्रेण तु हता ये वै इति श
स्त्रहतदेवताविधिनैवैकस्य द्वयोर्वा शस्त्रादिमरणे एकोद्दिष्टस्यान्यथानुपपत्त्या प्राप्तेस्त्रिषु मृतेषु उक्त
र्थं पार्वणवत्कुर्यादिति सपिंडनोत्तरभावित्वेन मामात्रवचनप्राप्तस्यापि पार्वणविधेस्ताधास्यार्वण।

श्रा। म०
८

मेव कार्यं अत एकस्मिन्नप्यादिष्टवर्गे किं सोमं न वचनात्मायश्चाप्यस्येवार्थस्यानुवादकं न विधायकं कस्मि
न्दर्यास्स॥ अपरार्कस्मृतिचंद्रिकाहेमाद्र्यादीनामप्ययमेवाशयो लक्ष्यते नैरिनां तत्र तु श्राद्धादिदत्तानामपि
पार्वणमेव॥ न याचप्रजापतिः॥ संक्रांताश्चपरागे च पर्वेति स्वबमहालये निर्वपन्ते त्रपिंडं स्त्री निति श्रा
द्धप्रजापतिरिति॥ ॥अथ काम्यश्राद्धानि विष्णुधर्मोत्तरे॥ ॥अतः काम्यानि वक्ष्यामि श्राद्धानि तव पार्थिवः
आरोग्यमथ सौभाग्यं समरे विजयं तथा॥ सर्वकामांस्तथा विद्या धनं जीवितमेव च॥ आदित्यादिदिने
ष्वेवं श्राद्धं कुर्वन्सदा नरः॥ क्रमेणैतान्यवाप्नोति नात्र कार्या विचारणेति॥ मार्कंडेयः॥ कृत्तिकासु पितृन
र्च्य स्वर्गमाप्नोति मानवः॥ अपत्यकामो रोहिण्यां सौम्ये तेजस्वितां लभेत्॥ आर्द्रायां क्रौर्यमाप्नोति
क्षेत्रलाभः पुनः पुनर्वसौ॥ पुष्टिं पुष्ये पितृन पर्चाश्लेषासु वरान्सुतान्॥ मघासु स्वजनश्रेष्ठ्यं सौभाग्यं फ
ल्गुनीषु च॥ प्रदानशीलो भवति सापत्यस्तु त्तरासु च॥ प्राप्नोति श्रेष्ठतां सत्सु हस्ते दत्त्वा नरः॥ रूपवंति राम
चित्रासु तथा पत्यान वाप्नुयात्॥ वाणिज्ये लाभदा स्वातौ विशाखा पुत्रकामदा॥ कुर्वतामनुराधासु ८

दर्पं स्वकुलवर्तनं॥ ज्येष्ठायामथ वाधिपत्यं च मूले चारोग्यमुत्तमं॥ आषाढासु यशः प्राप्तिरुत्तरासु विशोकता॥ श्रव
णे च शुभांल्लोकान्धनिष्ठासु महद्धनं वेदविद्यामभिजिति त्रुनिषक्सिद्धिस्तु वारुणे॥ अजाविकं प्रोष्ठप
दे विंदेद्रायंतथोत्तरे॥ रेवतीषु तथा कुप्यं अश्विनीषु तुरंगमान्॥ श्राद्धं कुर्वंस्तथाप्नोति भरण्यामायुरुत्तमं॥ त
स्मात्काम्यानि कुर्वीत ऋक्षेष्वेतेषु तत्त्ववित्॥ सौम्यं मृगशिरः॥ चंकत्रवर्तनं सर्वन्नात्रानं मानवः॥ ॥
अयमहलयः॥ ॥ तत्र प्रोष्ठपदीश्राद्धं तावदुक्तं॥ ब्रह्मपुराणे॥ ॥ नांदीमुखानां प्रत्यब्दं कन्याराशिगते
रवौ॥ पौर्णमास्यां तु कर्तव्यं वराहवचनं यथा॥ पिता पितामहश्चैव तथैव प्रपितामहः॥ त्रयो ह्यश्रुमुखा
ह्येते पितरः संप्रकीर्तिताः॥ तेभ्यः परतरे ये तु नांदीमुखाः स्मृता इति॥ अस्मिंश्च श्राद्धे मातामहपार्वणं नाचरंति
शिष्टाः॥ यत्तु कश्चिदाह सर्वश्राद्धानां दर्शविकृतित्वात्तत्र च मातामहादीनामप्येवमिति मातामहत्रयस्य प्रा
दिदापिंडाभिःस्यादेव पितरो यत्र पूज्यंते तत्र मातामहा अपीति धौम्यवाक्येन वाधाभिः॥ न च प्रोष्ठपदीश्रा
द्धपित्रनावान्मातामहानुष्ठानं॥ पितरो यत्र पूज्यंत इत्यत्र हि पितृशब्दः सपिंडीकरणं तश्राद्धजन्यपितृ

भावपरेनजनकपरः॥तत्रबहुत्वानुपपत्तेः॥पितृपितृसमुदाये॥पितरश्चइतिलक्षणयाश्वशुराकाश्यपलाने
अनस्तुपगमादिति॥इहस्मिन्नत्रापिद्वयोगः॥पितृपात्रेषुचेतयावंप्रसेचयेदित्यादौ॥तस्मादनुष्ठेयमाता
महपार्वणमिति॥तत्र॥यद्यपिक्वचित्पितृशब्दःसपिंडीकरणंतस्माद्जन्मपितृनावपरस्तथापिद्वन्त
यालिंगस्यसमवायस्यापानुपितृसमुदायपरत्वमेव॥कर्ष्णसमन्वितंमृक्कानयाद्यंश्राद्धषोडशं॥ब्रह्मावि
केचशेषेषुपिंडास्तुःषडितिस्थितिपरिशिष्टेपर्युदासानुपपत्तेःषोडशश्राद्धेपुत्रउक्तरीत्यामातामहानामश्रा॰
तिः॥ननुषोडशश्राद्धानामेकोद्दिष्टत्वपक्षेपिकथंप्राप्तिरितिचेत्॥पितृणामुद्देश्यत्वेतनतविशेषेणप्रावि
वक्षितत्वात्॥नचैवंचतुर्दशानांमपिमातामहप्राप्तिःश्राद्धंकाम्यश्राद्धंवास्त्वहतस्यैवेतिएवकारेणेतरव्यावृत्तेः॥वि
च॥अन्वष्टक्यंगयाश्राद्धेसंन्यायस्यमृताहनि॥मातुःश्राद्धंतनंकुर्यादितियपितृजीवतीतिजीवत्सितकृ
त्यान्वष्टक्यश्राद्धेमातामहप्राप्तिःकेनवाक्येनमातादिषुसपिंडनांतश्राद्धजन्मपितृत्वस्यविद्यमानत्वात्॥ राम॰
ननुक्तंदर्शश्राद्धस्यमातामहानांप्राप्तिरितितन्न॥देवतांतरविधिनाप्राकृतदेवतावाधात्॥अतोयत्रनदेवता ९

परेद्युःसंक्रांत्यादिश्राद्धेषुतन्नैवबाहृतदेवताःप्राप्तिर्निर्विहितदेवताकेषुतिसिद्धोष्टपदीश्राद्धेमातामहानन्तु
ष्ठानं॥॥अथप्रवृत्तिपदादिश्राद्धानि॥॥तत्रहरन्मनुः॥॥आषाढीमवधिंकृत्वापंचमंपक्षमाश्रिता॥कांक्षं
तिपितरः॥क्लिष्टाअशुमप्यन्तदंजलं॥आषाढामवधिंकृत्वायःपक्षपंचमोनवेत्॥तत्रश्राद्धप्रकुर्वीतक
न्यास्थार्केनिवेन्नवा॥अत्राद्यश्लोकोत्तरार्द्धन्निम्नतः॥आषाढ्यापंचमेपक्षेयःश्राद्धंनकरिष्यति॥तत्केन
पितृरिद्धोपिसोन्यजत्वमुपेष्यतीतिनागरखंडग्रहकाम्यतापि॥पुत्रानायुस्तथारोग्यंऐश्वर्यमितुलंतथा॥प्रा
प्नोतिपंचमेदत्वाश्राद्धंकामांश्चपुष्कलानितिकार्ष्णाजिनिस्मृतेः॥आदित्यपुराणे॥पक्षांतरेपिकन्यास्थे
रवौश्राद्धंप्रदद्यस्तेः॥कन्यागतेपंचमेतुविशेषेणैवकारयेदिति॥गौतमः॥अपरपक्षेश्राद्धंपितृभ्योदद्या॰
त्पंचम्यादिदर्शांतं॥अष्टम्यादिदर्शात्यादिसर्वस्मिन्वेति॥कार्ष्णाजिनिः॥आर्द्रामध्येवृसानेवापक्षकस्मार
विवर्जितं॥सपक्षःसकलःपूज्यःश्राद्धंषोडशकंप्रति॥ब्राह्मेऽपिनमस्कृत्यपक्षेतुश्राद्धंकुर्याद्दिनेदिने॥त्रि
भागहीनपक्षकात्रिभागंत्वर्द्धमेवचेति॥त्रिभागहीनःषष्ठीप्रवृत्तिः॥त्रिभागएकादश्यादिः॥तुरीयेतुवपोर

श्रा॰म॰
१०

न्यादिरपीति वाच्यं ॥ तेन तन्मते प्रतिसंवत्सरं माघ्यष्टमीरक्षास्वेकादश्यां त्रयोदश्यां प्रत्यतीतिसमपक्षाविनाग
हीनन्निमागपदास्यामस्मोतरयापंचमीदशम्यां घोरे वृपक्षयोर्ग्रहणमिति केचित् ॥ वस्तुतस्तु पंचम्यादि
दशम्यादिद्वादश्यादिपरयोरतद्गुणसंविज्ञानबहुव्रीहिणैकमलकल्पतत्त्वा घवापषष्ठ्येकादशीपक्षा
वेवग्रहेते ॥ एवमद्यपरेनाष्टम्यादितुरीयपादपूरकइति ॥ अतएव विशुद्धधर्मोत्तरे ॥ उत्तरादयनाद्धग्
न्येष्टस्याद्दक्षिणायनं ॥ याम्यायनाच्चतुर्मासं ततत्सुमेतु केशवे ॥ प्रोष्ठपद्याःपरःपक्षस्तत्राप्यत्र विशेष
तः ॥ पंचम्यूर्ध्वंतु तत्रापि दशम्यूर्ध्वं ततोप्यति ॥ मयायुक्तातु तत्रापि राजन्मुक्ता त्रयोदशीतिए तेचपक्षाः
क्तितोव्यवस्थायाः ॥ श्लोकगौतमः ॥ कन्यागते सवितरि यान्यहानि तु षोडश ॥ क्रतुभिस्तानि तुल्यानि सं
पूर्णैनरदक्षिणैरिति ॥ तिथिरद्य षोडशसाम्येपंचदशेति माधवः ॥ प्रौष्ठपद्यासहेति हेमाद्रिः ॥ तत्वं तु देव
लआह ॥ अहःषोडशकं यत्तु शुक्लप्रतिपदा सह ॥ चंद्रक्षयाविशेषेण सापि दर्शात्मिका स्मृतेति ॥ अत्र न
मस्यापरे पक्षेति थिषोडशकं तु यत् ॥ कन्यास्यार्कान्वितः श्रेयान्कालः श्राद्धकर्मणीति ग्रामपांपनिवाक्ये सं

श्रा॰म॰
१०

व्यायुक्ते पुत्रसमुच्चयः स्यादिति न्याये न तिथीनां श्राद्धे समुच्चयाव गमात तस्य च श्राद्धं प्रत्तिविनानुपपत्तेरे
कस्येव श्राद्धस्य सायंवातरग्निहोत्रहोमस्येवावृत्तिः ॥ तत्रानेकदिनसाध्यएकएव श्राद्धप्रयोगः ॥ तेनब्रा
ह्मणदेशाद्दक्षिण्यनामस्यैकमिति केचित् ॥ वस्तुतस्तु आद्यो मध्ये वसाने वायत्र कन्यां रविव्रजेत् ॥ स
पक्षःसकलःपूज्यःश्राद्धषोडशकं प्रतिति कार्ष्णाजिनिवाक्यातिस्त्वत्कृतार्जुदोतीति वत्कर्मणोनेदएव
पद्विवाक्यांतरप्राप्तमेकं श्राद्धमयूरस्तिथिसमुच्चयोविधीयेत तोन नेदःस्यात् प्रसृतको न्यत्रिःकृत्गुण
विधिरिति विनिगमनाविरहात् ॥ ग्रामग्रामयनिवाक्यस्योन्नतिपरतया समुच्चितानेकतिथिविशिष्टकर्म
विधिस्तु तन्ने दवरिष्टापि नेदएव युक्तः ॥ एवंच ब्राह्मणादीनामपि नेदोनवतीति दिक् ॥ पूर्वोक्तेपंचम्या
दिपक्षेघशाक्तस्तएकस्मिन्नपिदिने कुर्यात् ॥ आषाढ्याः पंचमे पक्षेकन्यासंस्थे दिवाकरे ॥ यो वै श्राद्धं
नरः कुर्यादेकस्मिन्नपिवासरे ॥ तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवमितिहेमाद्रौ नागरखंडोक्तेः पत्नु
निर्णयदीपिकायां ॥ मृताहनिपितुर्यो वै श्राद्धं दास्यतिमानवा ॥ इति द्वितीयमद्यमले वियत्र कानि

श्रा·म·
११

यत्नेनानेदि॥ यातिथिर्यस्य मासस्य मृतं हेतु प्रवर्तते॥ सा तिथिः पितृपक्षेपि प्रजनीयाः प्रयत्नतः॥ तिथि
च्छेदेन कर्तव्यो विनाशौचं यदृच्छया॥ पिंडश्राद्धं च कर्तव्यं विच्छित्तिं नैव कारयेत्॥ अशक्तः पक्षमध्ये तु
करोत्येकदिने यदि॥ निषिद्धेपि दिने कुर्यात्पिंडदानं यथाविधि॥ तिन्महानि वंधे लिखनान्निर्मूलं॥ अतो
निषिद्धे यस्मिन्कस्मिन्नपि दिने कार्यं न तु निषिद्धेपि मृताहनातिनि यमः॥ अत्रानुपपन्नौ पक्षांतरमाह
यमः॥ हंसे वर्षासि कन्यास्थे शाकेनापि गृहे वसन्॥ पंचम्योरंतरे दद्यादुभयोरपि पक्षयोः॥ पक्षमध्ये कय
विच्छाद्वेन जातेषु समतः॥ कन्या राशौ महाराजयावत्तिष्ठेद्दिवा वसुः॥ तस्मात्कालान वेदं यं वृश्चिकं यावदा
गत इति॥ ॥अथ महालये निषिद्धकालः॥ ॥तत्र सपेहभो का॥ ॥नंदायां भार्गवारे च रक्षे वह्निपितृकाल
ते॥ गंडे वैधृतिपाते च पिंडस्याप्यास्ते सुमिः॥ नंदा प्रतिपत्स्य ष्ठेकादश्यः॥ अपसप्तमी कामरूप्ये दशा
आरोग्नोमः॥ अग्निपितृकालनाविकर्तिकामघानरण्यः॥ पातो व्यतीपातः॥ अत्र सप्तमी रविर्नेम नराणां
गंडवैधृतिव्यतीपातेषु मृत्यवचोवेष्टांवसिष्टः॥ नंदायां भार्गवदिने चतुर्दश्यां त्रिजन्मसु॥ एषुश्राद्धं न

राम·
११

कुर्वीत गृही पुत्रधनक्षयात्॥ त्रिजन्म जन्मभं॥ ततो न वमसे कोच विंशं चेति॥ यत्तु कर्तुः स्वपुत्रदारयोः त्रिजन्म:
न्नापि चिंतयेत्॥ इति तत्राकारिंत्य॥ नारदः॥ कृत्तिकायां च नंदायां भृगुवारे त्रिजन्मसु॥ पिंडदानं न कर्तव्यं
पिंडं त्वयकरं यतः॥ त्रिजन्मसु त्रिपादेषु नंदायां भृगुवासरे॥ क्षत्रपौष्ण नयोश्राद्धं न कर्तव्यं कुलक्षयात्॥
मकन्महालयेश्राद्धे पुनःश्राद्धे दिलेषु च॥ अतीतविषयेश्चैवमेतत्सर्वं विचिंतयेदिति॥ वृद्धगर्गः॥ प्राजापत्ये
च पौष्णे च पित्र्यर्क्षे भार्गवे तथा॥ यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यतीति॥ प्राजापत्यं रोहिणी॥ पौष्णं रेव
ती॥ पित्र्यर्क्षं मघा॥ अस्यापवादो हेमाद्रौ वृत्तिप्रयोगपारिजाते॥ अमापातेन रण्यां च द्वादश्यां पक्षमध्यके
तथा तिथिं च नक्षत्रं वारं च न विचारयेदिति॥ इदं च हेमाद्रिमुक्ते पुनरत्रपते॥ महालयश्राद्धं वाधिमासे
न कर्तव्यं॥ ननोवायन नस्यो वामन मासे यदा न वेत्॥ अप सप्तमः पितृपक्षः स्यात् अन्यश्चैव तु पंचमः इति नाग
रखंडात्॥ पंचमसप्तमतेआषाढपूर्णिमांतः हृद्धिश्राद्धं तथा सोममससाधानं महालयं॥ राजाभिषेकं काम्यं
च न कुर्याज्ञानुलंघितइति नगुक्तेश्च॥ तत्र विशेषो देवः॥ तावद्धुरिजोचनैः॥ तथादित्यपुराणे॥ अपिकन्याग

श्रा॰म॰ तेषु यैकाम्येच धूरिलोचनौ॥ कस्मादागत इति कंन्यासंक्रांति निमित्तं केश्राद्धे इति केचित्॥ तदानुमहालयेपुरूरव
१२ इवा चेति॥ पित्रोरेवता क्रममाह वोपदेवि॥ तातंवान्वितयसपत्नजननीमातामातामहादित्रयंसस्त्रिमात
न याः रितातजननी स्वभ्रातरःसस्त्रियः॥ तातं वाम्ननगम्यापत्यधवपुत्रजायापितामह गुरुदन्तिशिष्यामातः पित
रो महालयविधौतात्पर्येति घातर्पणे इति॥ तातं वान्वितयं पित्रादित्रयं॥ मात्रादित्रयं च॥ मातामहादित्रयं
सस्त्रीति सपत्निकमितिप्रयोज्यं॥ अपत्यधवपुत्रिति॥ सापत्यां सधवामित्यर्थः॥ यत्तु पार्वणत्रयं काये
तथा च श्राद्धहेमाद्रौ महालयेगयाश्राद्धे वृद्धौ वान्वष्टकासु च॥ नवदैवतमत्रेष्टं शेषषाट्पौरुषं विदुरिति
सममर्थस्तु द्वादशदैवत्यं॥ तथा वह्नितनिर्णये निगमे॥ महालये गयाश्राद्धे वृद्धौ वान्वष्टकासु च॥ ज्ञेयं
द्वादशदैवत्यं ना पेक्षेत्र मघासु चेति॥ कर्मांतरे प्रघट्टकेस्पष्टं तरे॥ आदौ पिता ततो माता सापत्नजननी
तथा॥ मातामहाः सपत्नीकाः सपत्नी तदनंतरं॥ सुतभ्रातृपितृव्याश्च मातुलाश्च सपत्निकाः॥ दुहितानगिनी चै राम॰
व दौहित्रो भागिनेयकः॥ पितृष्वसा मातृष्वसा श्वशुरो गुरुरर्थिन इति॥ कर्मांतरं प्रयोगपारिजाते संग्रहे॥ पितृ १२

ष्वसा मातृष्वसा श्वशुरो गुरुरर्थिन इति॥ कर्मांतरं प्रयोगपारिजाते संग्रहे॥ पितृमातृमातामहपितृव्यो भ्रातरः
सुतः॥ पितृष्वसा मातुलश्च तद्भगिन्यः स्वजामयः॥ भार्या भागिन्यो दुहिता श्वशुरा मातुलकास्तु षालक को गुरु
रुचार्यः स्वामि मित्रं यथाक्रममिति॥ स्वजामयः स्वभगिन्यः॥ भातुका भगिनी यतयः॥ एतेषां क्रमाणामेकै
को विकल्प्यः पित्रादिभिन्नानां महालये एकोद्दिष्टमेव॥ उपाध्यायगुरुस्यकपितृव्याचार्यमातुलाः॥ श्वसुर
भ्रातृतनयसुतऋत्विक्शिष्यस्वपोषकाः॥ भगिनी स्वामिदुहितृजामातृभगिनीसुता॥ इत्युपक्रम्य सपिंडब
ह्मशिष्याद्यास्तीर्थेचैव महालये॥ एकोद्दिष्टेन विधिना पूजनीया अपत्नक इति हेमाद्रौ पुराणे कं॥ सुमंतु
रपि॥ सपिंडीकरणादूर्ध्वं यत्र यत्र प्रदीयते॥ भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय वा॥ मित्राय गुरवे श्रा
द्धमेकोद्दिष्टं न पार्वणमिति सपत्नमातुरप्येकोद्दिष्टमेव तथा चैतत्क्रमे हेमाद्रौ जातूकर्ण्यः सपिंडीकरणादूर्ध्वं
पित्रोरेव हि पार्वणं॥ पितृव्यभ्रातृमातृणामेकोद्दिष्टं न पार्वणमिति॥ यत्तु पार्वणरेकोद्दिष्टयोः क्रममाह॥
तत्रैव मरीचिः॥ यद्येकत्र भवेत्स्याता मेकोद्दिष्टं न पार्वणं पार्वणित्वमिति निर्वप्य एकोद्दिष्टं समापयेत्॥ सुतः

श्री·म· स्य:॥ महालयेगयाश्राद्धेगतास्तनांन्हयेद्दनि॥ तंत्रेणश्रपणंकृत्वाश्राद्धंकृत्वापृथक्पृथगिति यत्तुपरान्नंयत्र
१२ पत्रैषांसपिंडीकरणंस्मरं॥ तत्रापार्वणवत्कुर्यादेकोद्दिष्टंत्यजेद्बुधइतितद्देतादृशैकोद्दिष्टविधिनाधारेत
द्व्यतिरिक्तविषयं॥ बहुविप्रासंभवेचतुर्विंप्रातिमतो॥ एकस्मिन्ब्राह्मणेसर्वेनाचार्यादीन्प्रपूजयेत्॥ प्रति
श्रवनरणाश्राद्धेगयाफलं॥ नरणापित्स्यत्तेतुमहतीपरिकीर्तिता॥ असांश्राद्धंकृतंयेनसगयाश्राद्धकृद्
वेदितिमात्स्यात्॥ महालयेसमम्यादिद्विरिनेषुमाध्यावर्षाख्यंश्राद्धंतथाकान्वष्टकापूर्वेषुश्राद्धमुक्ता॥
थामत्स्यापन:॥ एतेनमाध्यावर्षप्रोष्टपद्याअपरापक्षइति॥ मध्येवर्षासुनवंमाध्यावर्षमित्यर्थः॥ हरदत्त
स्तुमाध्यावर्षमितिपपाठमघायुतवर्षासुनवंमाध्यावर्षमघाश्राद्धमितिनिर्णितायं॥ यत्रत्याष्टमीनर्म्या
वेरष्टकात्वष्टकाश्राद्धेनिर्णितेघाकृद्यमेवान्वष्टकाःस्तयनवमोसौनाग्पनवमीतिव्यवह्रियतेपामरैस्तन
त्वत्रकर्मनिर्देनप्रमाणंकिंचिदस्तिविवेलवानांसंन्यासिनांचमहालयश्राद्धंद्वादश्यांकार्यं॥ यतीनांचवन राम·
स्थानांवैखवानांविशेषतः॥ द्वादश्यांविहितंश्राद्धंकृष्णपक्षेविशेषतइतिवृतापमार्कंडेसंग्रहेके॥ संन्या १२

सिनोप्याब्दिकादिपुत्रःकुर्याद्यथाविधि॥ महालयेतुयच्छ्राद्धंद्वादश्यांपार्वणेनवेदितितत्रैववायवीयाच्च॥ अ
पत्रयोदश्यांश्राद्धं॥ मनु:॥ यत्किंचिन्मधुनामिश्रंप्रदद्यात्तुत्रयोदशीं॥ तदप्यक्षयमेवस्याद्वर्षासुचम
घासुचेति॥ एतन्मधुरान्नकेनैनकार्यं॥ अत्रतागेपशुस्त्रैवश्राद्धेमांसंतमधुरेवराद्रसुतोत्पत्ति
कस्तौपंचविवर्जयेदितिनिगमोक्तेः॥ एतच्चदिनांतरगतास्वपिमघासुचेतिचकारात्॥ अतएवचत्रयोद
शीमघाश्राद्धयोर्नेदः॥ प्रत्यासेपोष्टकपालोमावास्यायांपौर्णमास्यांवान्यतोभवतांत्यत्रैवचकाराद्राश्र
ययोर्नेदः॥ मघात्रयोदश्योर्योगेफलाधिक्यं॥ त्रयोदश्यानाइपदीकृष्णामुख्यापितृप्रियातस्यांतिपितर
स्तस्यांस्वयंपंचदशात्तेसमाः॥ मघायुतायांतस्यांतुजलाद्यैरपितोषिताः॥ तृप्यंतिपितरस्तस्यांवर्षाणिम
युतायुतंइतिस्मृतिचंद्रिकायांस्मृत्यंतरात्॥ प्रौष्टपद्यामतीतायांमघायुक्तंत्रयोदशीं॥ प्राप्यतुश्राद्ध
जामिष्टाप्यगाःस्वर्गमारोग्यंचधनंतथा॥ नृणांश्राद्धेस्सरःश्रीतावृप्यदंतिपितामहाइतिपारिजातेन्दांखो
के:॥ अत्रचत्रयोदश्यांश्राद्धंनित्यमिति॥ प्रौष्टपद्यामतीतायांतथाकृष्णत्रयोदशीतिकालानुक्ताश्राद्धमेवध

श्रा॰म॰ कुर्वाणो नरकं व्रजति पद्मनशतिकाजहेमाद्रौ विष्णुधर्मोत्तरात् ॥ मघासु च ततोन्यत्र नाधिश्राद्धे चाविभक्तानाम॰
१४ पि पृथगधिकारः ॥ विभक्ता वाविभक्ता वा कुर्याच्छ्राद्धं पृथक्पृथक् ॥ मघासु च ततोन्यत्र नाधिकारः पृथग्विने
ति हेमाद्रौ स्मृतेः ॥ इयं च गजच्छायेति निरणापि गच्छायानिर्णये प्रोक्ता ॥ मघात्रयोदश्यां योगे त्वियं श्राद्धम
धिमासेपि भवति ॥ तथा च कारकगृह्ये ॥ मघात्रयोदश्यां श्राद्धं पत्नुपस्थिति हेतुकं ॥ अनन्यगतिकत्वेन
कत्वेन कर्तव्यं स्यान्मलिम्लुच इति ॥ केवलमघायुक्त केवलत्रयोदश्यायुक्ते तु न भवति ॥ ख्रुद्दमासेपि
त्रयोऽसंभवेनसंभवेनसगतिकत्वात् ॥ अत एव पत्न्युपस्थितिहेतुकमनन्यगतिकत्वेनेति च हेतुनिर्देशो
पि संगच्छते ॥ यत्तु वामनपुराणे ॥ त्रयोदश्यां तु वैश्राद्धं न कुर्यात्पुत्रवान्गृही इति ॥ यत्तु गिरा ॥ त्रयोदश्यां
कृष्णपक्षे यः श्राद्धं कुरुते नरः ॥ पंचत्वं तस्य जानीयाज्ज्येष्ठपुत्रस्य निश्चितमिति ॥ तत्तु त्रयोदश्यां मघा
युक्तत्रयोदश्यां सपिंडकश्राद्धनिषेधपरं ॥ अत एव प्रतापमार्तंडे वृद्धस्यरात्रगर ॥ मघायुक्तत्रयोदश्यां राम॰
पिंडनिर्वपणं द्विजः ॥ स संतानो नैव कुर्यान्नित्यं ते केवयोविदुरिति ॥ यत्तु हेमाद्रौ नागरखंडे ॥ असतान १५

स्तु यः स्य श्राद्धं प्रोक्तात्रयोदश्यां ॥ संतानयुक्तो यः कुर्यात्तस्य वंशक्षयो भवेदिति ॥ तदपि सपिंडकश्राद्धनिषे
धपरं यत्तु कार्ष्णाजिनिः ॥ श्राद्धं न वैकवर्गस्यं त्रयोदश्यामुपक्रमेत् ॥ नत्रसाम्यस्य ये यस्य पूजां दिसंततिनस्य
तइति ॥ तन्निरोपनद्भूल्यतेनत्र मातामहश्राद्धपीति धौम्यवाक्येन मातामहश्राद्धमपि त्रमघामेकपार्वण
निषेधार्थमिति हेमाद्रिः ॥ यत्तु त्वमघामनिषेधे वचो वै यथ्याजीवन्मातामहवर्गकं वत्यिषयं निषेधस्त्वे
कवर्गयजनश्राद्धमिति ॥ तत्रथ्यों त्राद्धिका पर्यात्रासंगते ॥ युक्तं तु यावत्किंचित्स्वगृह्योक्तं यस्य कर्म वचो
दितं ॥ तस्य तावति शास्त्रार्थे कृते त्तेन भवेदिति वाक्येन येषां स्वत्रे मातामहश्राद्धास्त्रातास्त्वतिसामान्यतः श्राद्धम॰
स्येकपार्वणस्य निषेधार्थमिति ॥ अत्र मघात्रयोदश्यां युगादिश्राद्धानां तत्रतामहालयश्राद्धकरणपक्षेतु
तेनैवेषां प्रसंगसिद्धिः ॥ बह्वृचे तु त्वसपिंडवादिनिविशेषग्रहणात् ॥ महालयश्राद्धस्यापि तत्कोस्तु कस्य
चिन्मस्त्वस्य प्रजापत्याद्युपेत्या ॥ इति महालये त्रयोदशी ॥ ॥ अथात्र चतुर्दश्यां स्वैवधमृतानामेकोद्दिष्टं
उक्तं प्राक् ॥ तत्र विश्वेदेवा अपि भवंत्वात्तिस्मृत्यर्थसारे प्रयोगपारिजाते च ॥ वेनपत्ते चतुर्दश्यामेकोद्दिष्टं॰

श्रा॰म॰ विधानतोदेवयुक्तंतुनष्टाद्धंपित्र्यमप्यनेनतु॥नष्टाद्धंदेवदानंचेत्सुत्रदारधनक्षयइतिमहालयेचतुर्दश्या
१५ श्राद्धंतुमध्येचेदच्छिकरत्वनिपर्यंतंयस्मिन्कस्मिन्दिनेतएकोद्दिष्टविधिनैवकार्यंयथाप्राप्तएवगौणकालवि
धानात्॥एतेननष्टोद्धारनंदीयापार्वणोक्तिरयास्ता॥अमायांरवौदर्शस्यौचेत्तागजच्छायेत्युक्तंश्राद्धं॥श्रा
द्धेनत्युक्तंइतिपरिमातामहश्राद्धयुक्तंहेमाद्रौ॥जातमात्रोपिदौहित्रोविद्यमानेपिमातुलेकुर्यान्मातामह
श्राद्धंप्रतिपद्याश्विनेसितइतिस्मृते॥जातमात्रोधिकारीजायमानइत्यर्थः॥जायमानेवैब्राह्मणस्त्रिभिर्ऋ
णवाञ्जायतेइत्यत्रेवाधिकारीजायमानइत्यर्थः॥तेनोपनयनात्प्रागेनद्धाद्दानुष्ठानमिदानीतनानांगुरु
चारएव॥एतच्चजीवत्पितृकस्यएवकुर्यादितिसांप्रदायिकाःएतच्चसपिंडकमेवकार्यंपितुसुंडनंपिंडदानं
वपेतकर्मचसर्वगः॥नजीवत्पितृकःकुर्याद्गुर्विणीपतिरेवचइत्यस्यनित्यमितिकश्चित्लेखनंदत्तस्मृतौ
श्रेयांनरेवानानामान्निर्मूलं॥यत्तस्याःसंगवव्यापित्वबोधकंवचःप्रतिपद्याश्विनेशुक्लेदौहित्रस्त्वेकपार्व राम॰
णं॥श्राद्धंमातामहेकुर्यात्सपितासंगवेदेतितन्निर्मूलं॥तत्याद्रस्याश्राद्धकालत्वमाहाव्यासः॥मासपक्षति १५

थिस्पृष्टेयोयस्मिन्म्रियतेहनि॥प्रत्यब्दंतुतथाभूतंतत्याहंतस्यतंविदुरिति॥संन्यासिनांतुतत्याहेपार्वणमेव
नैकोद्दिष्टं॥नयाचप्रचेताः॥एकोद्दिष्टंयतेर्नास्तित्रिदंडग्रहणादिह॥सपिंडीकरणाभावात्पार्वणंतस्यसर्व
देति॥पत्नीतिविशेषतोपिपार्वणनियमःस्मृतौ॥अमावास्यान्तयोयस्यप्रेतायत्नेपितापुनः॥पार्वणंत
त्रकर्तव्यंनैकोद्दिष्टंकदाचनेति॥इदंचानाकरमितिविज्ञानेश्वरः॥तंरवस्मृतिमस्तमितिमाधवः॥त्रिस्थ
लीरोप्येतद्वाक्यानुकारी॥अमावास्यामहालयनिवृत्तत्याहेपिसांसिन्नानांपार्वणैकोद्दिष्टयोर्विक
ल्पः॥वचनद्वैविध्यात्तथाचशातातपः॥सपिंडीकरणंकृत्वाकुर्यात्पार्वणंसदा॥प्रतिसंवत्सरंवि
द्वान्छागलेयोदितोविधिरिति॥यस्तुसपिंडीकरणादूर्ध्वंप्रतिसंवत्सरंसुतैः॥मातापित्रोःपृथक्कुर्या
देकोद्दिष्टंमृतेहनीति॥अथवकुलाचाराद्व्यवस्थेतिमिताक्षरायां॥माहिकादिषुमातामहपर्युदासमाह
कात्यायनः॥कर्षूसमन्वितंमुक्त्वातथाद्यंश्राद्धषोडशं॥प्रत्याब्दिकंचशेषेषुपिंडाःस्युःषडितिस्थितिरिति
कर्षूसमन्वितंसपिंडनंतच्चकर्षूयंतत्कर्तृविधानात्॥ ॥इतिश्राद्धकालाः॥ ॥तत्याद्धाज्ञानेतुतत्याह

श्राद्धं ब्रह्मस्य बृहस्पतिः ॥ न ज्ञायते मृताहस्तेस्वधीते प्रोषिते सति ॥ मासश्चेन्नतिविज्ञातस्तद्दर्शे स्यान्मृतेहनि
॥ तद्दर्शेमृताहस्तोतिसामानाधिकरण्यं ॥ तद्दर्शएवमृताहइत्यर्थः ॥ मरीचिः ॥ श्राद्धविघ्ने समुत्पन्ने अवि
ज्ञाते मृतेहनि ॥ एकादश्यां तु कर्त्तव्यं कृष्णपक्षे विशेषतः ॥ अमावास्यैकदर्शेप्येकविकल्पः विशेषतस्
शुक्लामुक्तपक्षेपातिदृश्यापि ॥ दिनाज्ञाने मासाज्ञाने च न विष्णुपुराणे ॥ दिनमेव न जानाति मासमेवापि क
दाचन ॥ कार्यं तेनथमायां वैशाख्यामाघेयमार्गके ॥ कदाचनन ज्ञातातीतुपगः ॥ वस्थानमासतद्दिनज्ञा
नेतुतदेव श्राद्धं ॥ तथाच बृहस्पतिः ॥ दिनमासौ न विज्ञातौ मरणस्य यदा पुनः ॥ प्रस्थानतद्दिनमासौ तु याते
पूर्वोक्तपरिज्ञेति वेस्यानिकमासदिवसाज्ञाने तु न विष्णोक्तरे ॥ मतवान्नीकृते या सौतो पूर्वोक्तक्रमेणत्वि
तिमरणाश्रवणेतु ज्ञातु कर्ण्पितरिप्रोषिते यस्मनवान्नैर्नैववागतिः ॥ ऊर्ध्वं पंचदशाद्वर्षात्कृत्वा तत्प्र
तिरूपकं ॥ कुर्यात्तस्य च संस्कारं यथोक्तविधिना ततः ॥ तदादीन्येव सर्वाणि प्रेतकार्याणि संचरेदिति ॥ अ
त्र प्रोषितइत्येव विवक्षितं तेन तद्दिनशेषं पितरिस्म विवक्षितमनुवाद्यविशेषणत्वात ॥ तदादीन्येव

दाहदिनप्रभृत्येव संचरेत्कुर्यादित्यर्थः ॥ एवं च दाहदिनमेव तस्याहस्यानापन्नमिति तात्पर्यं बृहस्पतिः ॥ य
स्य न श्रूयते वार्त्ता यावद्द्वादशवत्सरं ॥ कुशपुत्तकदाहेन तस्य स्याद्वधारणं ॥ प्रेतक्रियोत्तरमागते विशेषो
बृहस्पतिनादर्शितः ॥ प्रोषितस्य यदा कालो गतश्चेद्दूरदेशकः ॥ ग्रामे तु यो रक्षो वर्षे प्रेतकार्याणि कारयेत् ॥
जीवन्यदि स आगच्छेत् घृतकुंभे निमज्जयेत् ॥ उद्धृत्य स्नापयित्वा तु जातकर्मादि कारयेत् ॥ द्वादशाहं व्रते
चर्यात्त्रिरात्रमथवास्य तु ॥ स्नात्वोद्वहेत तां भार्यामन्यां वा तदभावतः ॥ अग्नीनाधाय विधिवत् व्रात्यस्तो
मेन वा यजेत् ॥ अथैंद्राग्नेन पशुना गिरिं गत्वा च तत्र तु ॥ इष्टीमायुष्मतीं कुर्यादीप्सितांश्च क्रतूंस्ततः इति ॥ आशौ
चेनश्राद्धमनिषेधे विशेषः ॥ षट्त्रिंशन्मते ॥ मासिकाब्देतु संप्राप्ते अंतरा मृतसूतके ॥ कार्यं वदंति शुद्धेन
दर्शे वापि विशेषतः ॥ इति ॥ विशेषतः इत्युक्तापक्षेप्युत्तनायतइति हेमाद्रिः ॥ अविज्ञाते तदहश्चेत् प्रदुष्येतकेन
चित्तत्ववादिना ॥ सूतकानंतरं कार्यं पुनस्तदेव चेति ॥ तदहस्तत्रमासगतोतस्मिन्नेव दिन इत्यर्थः ॥ अत्रा
शौचांतद्वितीयपक्षः मुख्यकालप्रत्यासत्तेः ॥ ततोदर्शः ॥ ततः कृष्णैकादशी ततः शुक्ला ॥ ततउत्तरमासेतद

श्रा·म·
१७

शिनि हेमाद्रिः॥ केचित्तु पुनस्मरहरेवचेतिपक्षोमासिकपरोनत्वमासिकपरोपिएकोद्दिष्टेनुसंग्रामेयदिद्विम्र
प्रजायते॥ अन्यस्मिंस्तत्तिथौतस्मिन्श्राद्धंकुर्यात्स्वयत्नतइतिदेवलेनैकोद्दिष्टमासांतरस्यनदर्विधानात्॥
एकोद्दिष्टत्वंनुमासिकानामेवनत्वनुमासिकानामिति॥ अन्यस्मिन्मासोनरेतत्तिथौमरणतिथौतस्मिन्स्ते
हमलेसुत्केचेत्यर्थइत्याकः॥ वस्कनस्कः॥ आदिकस्यपूर्वमेकोद्दिष्टरूपत्वमप्युक्तं॥ अनुमासिकानामपिता
निप्रक्रम्ययोयथावार्षिकंकुर्यात्तथाकुर्यादित्यापोतिवाक्येनैकोद्दिष्टरूपतास्पष्टा॥ अतोवार्षिकि
मासिकानियदेकोद्दिष्टरूपाणिक्रियंतेतदामासांतरस्यतत्तिथौकार्याणि॥ यदातुपार्वणानिकानितदाम्र
तितिथिदर्शिक्लिलेसुत्केकादशपःकालायदपिदेयेपितृणांश्राद्धंतुआद्येचेजायते॥ नराआद्येचेतुव्यति
क्रांतेतेमःश्राद्धंप्रदीपतइतिकृष्णभट्टगोकेराद्येचमावपरत्वान्नतद्विषयोमासांतरगततिथिरूपःका
लइत्याकः॥ तत्रपूर्वोक्तिन्निवचनेआद्येचविप्रेमासांतरगततत्तिथिरूपकालोक्तविधानात्॥ यदपिम
धवन्सिहेमासिकंआद्येचेसतितरंतेआद्येचनिन्नविप्रेपुनस्तदरेव॥ पदूर्विंशन्मतेवचोगतमासि

राम·
१७

कपरंत्वनुमासिकपरं॥ अतआद्येचेसतितिरनुमासिकंआदिकंवान्तरंनेरत्नेनिकृत्यमासांसुत्कापांचेतिचत्वा
रःपक्षाःमासिकंत्वाद्येचेसतितदंतएव॥ विप्रांतरेतुमासांतरगतामातिथिरित्यादनु॥ तरप्यतेनैवप
रास्तेप्रमाणनावाञ्चाहारीतः॥ श्राद्धविघ्नोद्विजातिनामासश्राद्धंप्रकीर्तितं॥ अमावास्यादिनियतंमासस
वत्सराद्दतइति॥ मासमसंवत्सरान्मासिकसांवत्सरिकात॥ एतद्भिन्नंनियतंत्वमावास्यादिश्चमेनकार्यमि
त्यर्थः॥ श्राद्धविघ्नोत्रयत्नीरजोदर्शनं॥ अपत्नीकप्रवासीत्वनायदिस्यरजस्वला॥ सिद्धान्नेनतुकुर्वीतआ
मंतस्यविधीयतस्यविधीयतइतिउशनोवाक्यात्॥ आमान्नादेतुकासः॥ आमान्नादेद्विजानांवेप्रवासे
पुत्रजन्मनि॥ हेमश्राद्धंप्रकुर्वीतभार्यायस्यरजस्वलेति॥ इदंचामहेमविधानंआमावास्यादिश्राद्धविषयं॥
तयाद्दश्राद्धंतुरजोदर्शनात्संचमदिनेकार्यमतेइतिनुसंग्रहेयस्यभार्यारजस्वला॥ श्राद्धंतत्रनकर्त्त
व्यंकपक्ष्यंपंचमेदिनीतिश्लोकगौतमोक्ते॥ एतदापूर्विकस्मसंतरालप्रत्तुहेमाद्रिःमनुःपत्न्यामदश्राद्ध
धिकाराद्रजोदर्शनेनतस्याअधिकारप्रतिबंधेनतुरप्यनधिकारात्प्रतिविवर्देशोद्देकरकार्यमित्या

कोंढायांपंचमदिनविधिरित्याह॥नत्व॥यद्यपिहियस्तुःपत्न्याआहवनीयत्वादिकामनयाधानेअधिकारःसि
द्धस्तथाकृतपतिविद्ययैवकर्मनिवादेनस्याथब्रह्मविद्याकल्पनपरिजिहीर्षयासहाधिकारउपपद्यते
॥तस्याआहवनीयत्वाद्यकामनायांतुनसहाधिकारः॥नत्वेधिकारिकेकेवलमायावेक्षणैककर्तृत्व
मात्रंतस्याअध्यग्न्यादिरिवहोमादौएवमाहवनीयादिसाध्येषुदर्शपूर्णमासादिष्वपिपत्न्याफलकामना
यांसहाधिकारः॥नरनावेतुपत्युरेवाधिकारःपत्न्यास्तुकेवलमाज्यावेक्षणैककर्तृत्वमाद्यंनाधिकारः॥मंउ
नेनोक्तेतुल्यएवाधिकारःस्यात्॥अधिकारेपिवैषम्यमित्याधिकारगतेसाम्यवैषम्योक्तौअप्येतदनिवा
येएववचनतुं॥कामनानावेनाधिकारेपत्न्यास्तत्वमन्येनाधिकारेपतिंविनातस्याएवकेवलाप्रयोगे
स्तिनिवार्यंअहवविद्याकल्पनागौरवात्॥पत्युक्तरोगगनाद्योद्याविवतस्याअधिकारंविनाप्यप्रतिषिद्धो
धिकारः॥नचफलस्वाम्यधिकारिपपीमयतिव्याप्तादुत्पन्ननादेशाद्यापूर्वस्ययान्यांपत्नीत्वाद्दसिद्धेयमित्र
योगेतस्यांआज्यावेक्षणादिकर्तृत्वतन्निरूपितएवोपपद्यतेतिलाह्नवास्पत्नीशब्देनाधिकारोगम्यतइतिवा

यं॥पत्नीतुतुधनदारापत्नीदुहितरश्चैव॥अपुत्रस्वपितुःपत्न्यस्त्यादिषुपत्नीशब्दस्यफलस्वाम्ययोग्यतामा
त्रेदर्शवास्तुरोगनाद्यौत्सादौचतस्याफलोपधानासमत्वेनयोग्यतामात्रस्यावश्यसंगीकार्यत्वात्सर्वत्रयो
ग्यतयैवनिर्वाहः॥नदवच्छेदकंन्द्रात्वमेव॥किंच॥सर्वत्रापितुल्यमानएवफलेतत्स्वाम्यरूपाधिकारः
फलोपहितक्रतुप्रयोगादौतुनयोग्यतामात्रमेवनफलोपधानं॥योग्यतावच्छेदकेपरमनुगमः॥पय
हदस्पतिसवेब्रह्मणत्वं॥राजसूयेक्षत्रियत्वं॥एवमिहोढात्वमितिनकश्चिद्दोषः॥निरण्यापिचेदंम
याध्ययनवादेसप्रपंचमितिनेहविस्तरः॥पत्न्यधिकारिकेषुतत्पीतमात्तन्वाचादिदैवत्येषुतस्याअन
धिकारः॥प्रतिसंवत्सरंकार्यंमातापित्रोर्मृतेहनि॥पित्र्यस्याप्यपुत्रस्यन्यातुर्ज्येष्ठस्यचैवहीतिसंव
धिकपित्रमात्रादिपदागर्न्देवीपुराणादिवचसोतांप्रत्यहते॥अधिकारानावेचनकृतंसादित्संगर्नः॥
त्वावेणैवगलितं॥पाणिग्रहणाद्धिसहत्वंकर्मसुतथापुण्यफलेचेतिस्मृतिस्तुदार्शपौर्णमासीकादिस
हाधिकारमेवानुवदतिनास्यत्रविधत्ते॥अतःपूर्वोक्तवचनेनत्रयाहदिनबाधःपंचमदिनबाधःपंचम

दिनविधिश्चनसहाधिकारत्वेच॥अत्रकालादर्शानुयायिनःअपुत्रात्तु पत्न्या मासिमासे नर्तुरादिके॥अ
स्वलानवेत्तातुकुर्यात्तस्मिंश्चमेऽहनीति॥कालादर्शलिखितश्लोकगौतमवाक्यस्मृत्यन्तराद्याधिकारिणींस
यंश्रितिप्रवृत्तेऽन्यदेकमन्यत्कल्पनालाघवेनमृतेऽहनीतिअत्रापियस्यकर्तव्यतेति॥आख्येयमित्याकृ
माधवस्तुमतद्वयमपिलिलेखनतुकिंचिन्निर्णीतायां॥तातचरणास्तुमृतेऽहनीतिवचःपितृमातृमार
पितृव्यादिमासिकाब्दिकोनयपरं॥अपुत्रान्वितिश्लोकगौतमीयंतुन॰आदिकमात्रपरं॥अतोनिर्णवि
षयतयानेकमत्वेनतासंनवक्ष्याकृ॥अयंचतेषामाशयः॥श्राद्धविवेकेद्विजातीनामश्राद्धंप्रकीर्तितं॥अ
मावास्यादिनियतंमाससंवत्सरादृत॥इतिहारीतपर्युदस्तयोर्मासिकसांवत्सरिकयोरामश्राद्धनाद्वे
निर्णीतकांक्षायांमृतेऽहनीत्येतन्नुनयविषयंनाब्दिकमात्रेश्लोकगौतमीयेनोपसंहर्तुंशक्यं॥ममस्तुप्र
तिमासिकालादर्शादावनयोरपिवाक्ययोःश्लोकगौतमीयत्वपालिखनानोपसंहारोक्तः॥समान्यवचना
नर्थक्यापत्तेः॥ननुतर्हिवाक्यद्वयंकिंत्वेकस्मिन्नेववाक्येद्वयोपाठमात्रं॥ननत्रात्तुत्रातुयदेतिपाठपक्षेम

तेऽहनीत्येतस्मात्तुमास्यानुपूर्व्वकंस्मृत्यन्तरवाक्यंकथंनोपसंहृतमितिचेन्नृणु॥एतस्माद्द्वयमपिप्रमाण
त्वात्समुच्चयपत्ते॥संदिग्धत्वाद्धिकल्पनेवानाद्यःस्मृत्यन्तरवाक्यस्योपसंहारेपिएतस्मानार्थक्यमृतेऽह
नीत्यादेःसामान्यपरिनस्यानर्थक्यापत्यान्तरयोगात्॥नांत्यःस्मृत्यन्तरसंवादेनमृतेऽहनीत्येतस्यास्येव
प्रामाण्यनिश्चयात्पुत्रातुपरेत्यादेःप्रामाण्यत्वप्रामाणिकत्वात्॥यत्तुजोगाक्षि॥पुष्पवत्स्वपिदारेषुवि
देशस्थोप्यनग्निकः॥अन्नेनैवाब्दिकंकुर्याद्धेम्नावासेननकर्हिचित्इति॥तद्दाराणांपुष्पवत्त्वेनिमित्तेवाक्या
न्तरप्राप्तेपंचमदिनरूपेकालेऽन्नेनैवकुर्यादित्येवमासहेमपरिसंख्यामात्रार्थंनमृततिथिरूपकालवि
ध्यर्थं॥यत्त्वेतत्त्वेवार्थस्यसंग्राहकंपौरुषकंपौरुषेयंवाक्यं॥विदेशगोगेवाविगतापिकोवारजस्वलापि
नपिधर्मपत्नी॥श्राद्धमन्नादेमृताहेविदधातपाकेनर्तमेनहेम्नात्तुपंचमेह्नीति॥तदपिमन्नादेरजस्वला
यांधर्मपत्न्यांसत्यांश्राद्धंनामेनहेम्नानपंचमेह्नितुपाकेविदधात्येवंव्याख्येयं॥यत्तुपारिजातादौमासि
कानिसपिंडनिश्रमावास्यंतथाब्दिकं॥अन्नेनैवतुकर्तव्यंयस्यनार्यारजस्वला॥नत्वामपद्यामहेसपरि

श्रा॰म॰ संख्यामात्रा पंथ्याब्दिकं तु पंचमेक्षि अन्नेनैवे ग्रहणदिने भोजननिषेधप्रयोजकवेदमध्ये ग्रहणकाले वा आ
२० ब्दिकश्राद्धप्राप्तौ नोक्तब्रसणलाभे तैनैव कार्यं ॥ तदलाभे आमेन हेम्ना वा तथा च गोभिलः ॥ दर्शे रविग्रहे पि
त्रोः प्रत्याब्दिकमुपस्थितं ॥ अन्नेनासंभवे हेम्ना कुर्यादामेन वा सुत इति ॥ अन्नप्रदेयत्याब्दिकमुपस्थितमित्येवो
दूपसमर्पकं ॥ तेन रविग्रहेपि व्यतिरिक्तस्यापि चंद्रग्रहेपि पित्रादीनां सर्वेषामन्नादिभिर्यथासंभवं तद्दिन
एव कार्यं ॥ एवं मासिकमपि नाप सामान्य ॥ ग्रहणं तु द्वितीये क्रियते सोषां चयं च म इति तन्निर्मूलं ॥ ॥ अथ
श्राद्धे कालनिषेधः ॥ ॥ स्कांदे ॥ ॥ उपसंध्यं न कुर्वीत पितृपूजां कथंचनेति ॥ विष्णुः ॥ संध्यारात्र्योर्न कर्तव्यं श्रा
द्धं खलु विचक्षणैः ॥ तयोरपि च कर्तव्यं यदि स्याद्राहुदर्शनमिति ॥ संध्यायोगमाह याज्ञवल्क्यः ॥ ॥ उदया
त्प्राक्तनी संध्या मुहूर्तद्वयमुच्यते ॥ सायं संध्या त्रिघटिकास्तादुपरि भास्वतः ॥ ॥ अथ पिंडदाने कालनि
षेधः ब्रह्मपुराणे ॥ पराचरो त्रियोस्मेति ग्रहदंचेदविदग्निचित ॥ तेने कृतु कर्तव्यं पिंडनिर्वपणं द्वते ॥ हरस्मर
त्नारः ॥ युगादिषु मघायां च विषुवेष्वयने पवा ॥ नरणां पुत्रकुर्वीत पिंडनिर्वपणं नरः इति ॥ कृत्स्नरत्ने गर्गः ॥ रा॰म॰ २०

पौर्णमासीषु सर्वासु निषिद्धं पिंडपातनं वर्जयित्वाश्रौष्टपदीं यथा ग्रहसिपेवसेति ॥ अस्य समस्तत्वं विम
त्रपं ॥ ज्योतिःपराशरः ॥ विवाहे विहिते मासान्न त्यजेयुर्हद्रदरौ वृद्धि ॥ सपिंडपिंडनिर्वापं मौंजीबंधे च सर्ववृद्धि
ति ॥ क्वचित्सतित्रम त्रमप्यादसएवच ॥ माहात्ले येगयाश्राद्धं मातापित्रोर्न्तयेहनि ॥ यस्य कस्यापि मर्त्यस्य
सपिंडीकरणं तथा ॥ कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सदेति ॥ अपिंडके स्वधावाचनमपि प्रतिषेध
ति ॥ हेद्देगातातपः ॥ पिंडनिर्वापरहितं यत्तु श्राद्धं विधीयते ॥ स्वधावाचनलोपो त्रेति ॥ ॥ इति पिंडदान
निषेधकालः ॥ ॥ अथ श्राद्धदेशः ॥ ॥ विष्णुधर्मोत्तरे ॥ दक्षिणं प्रवणे देशे तीर्थादौ वा गृहेपि वा ॥ संसक्त
रादि संयुक्ते श्राद्धं कुर्याद्विचक्षणः ॥ दक्षिणप्रवणे दक्षिणतो वनते ॥ न्द्रसंस्कारो मार्जनलेपनादि ॥ शंख
॥ गोगजाश्वादिपृष्ठेषु कृत्रिमायां तथा भुवि ॥ न कुर्याच्छ्राद्धमेतेषु पारक्यासु च भूमिषु ॥ छन्निमायाम
रालिकाहौ ॥ पारक्यासु गृहीतासु ॥ ताम्रगोष्ठास मादपोनदुन्दसी यादि स्यानानि ॥ तथा च आदित्य
पुराणे ॥ अटवी पर्वताः पुण्या नदीतीराणि यानि च ॥ सर्वाण्यस्वामिकान्याहुर्न हि तेषु परिग्रह इति ॥

श्राद्धस्य पूजितो देशो गयागंगासरस्वतीकुरुक्षेत्रं प्रयागं च नैमिषं पुष्करं तथा॥ व्यासः॥ पुष्करेष्वक्षयं श्राद्धं
जपहोमतपांसि च॥ महोदधौ प्रयागे च काश्यां च कुरुजांगलइति॥ ॥ब्राह्मे पुराणे श्राद्धकल्पे चतु
र्दशोध्याये॥ ॥त्रिशंकुं वर्जयेद्देशं सर्वं द्वादशयोजनं॥ उत्तरेण महानद्या दक्षिणेन च कैकटं॥ देशा
स्त्रैशंकवो नाम वर्ज्या वै श्राद्धकर्मणि॥ सर्वकर्मणीति क्वचित्पाठः॥ महानदी फल्गुस्तस्यास्तीरद्वये प्रत्ये
कं द्वादशयोजनानि कैकटमित्यर्थः॥ इति श्राद्धदेशाः॥ ॥अथ श्राद्धाधिकारिणः॥ ॥शंखकात्यायनौ
॥ ॥पितुः पुत्रेण कर्तव्याः पिंडदानोदकक्रियाः॥ पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदरः॥ पुत्रग्रहणं पौ
त्रप्रपौत्रयोरुपलक्षणं॥ यथाह विष्णुः॥ ॥पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसंततिः॥ सपिंडसंतति
र्वापि श्राद्धार्हाः पिंडदायकाः इति॥ मनुः॥ पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिण इति॥ पुत्रप्रतिनिधी
न्क्षेत्रजादीन् क्रियालोपभयादित्यर्थः॥ औरसादीन् द्वादशपुत्रानुपक्रम्य याज्ञवल्क्योपि पिंडदोंशहर
श्चैषां पूर्वाभावे परः इति अत्र यद्यपि पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदर इति औरसपुत्रेण

सोदरे सा च पत्न्याः क्रमप्रतीयते तथापि पुत्रोपलक्षणत्वेनौरसपुत्रपत्न्योः क्रमे व्यवधिते सहत्वा॥ प्रत्रापा
ः किमवगुंठनेनेति न्यायेन पुत्रः पौत्रः प्रपौत्रो वेति वध्यक्रमयोः पौत्रप्रपौत्रयोरपि द्वादशविधपुत्रोत्तरप
त्न्याः पूर्वं विवेकः॥ पत्न्यभावे दुहिता॥ अपुत्रस्य तु या पुत्री सा पितृपिंडप्रदा भवेदिति ऋष्यशृंगः॥ अत्र य
द्यपि पुत्राभावे तु पत्नी स्यादित्यनेन न भ्रातावे पत्न्या अथ पुत्रस्य तु या पुत्रीत्यनेन दुहितुरधिकारः प्रतीतेः पुत्रा
भावे पत्नीकन्ययोर्नियामकाभावेन विकल्पप्रसक्तिस्तथापि यथार्थदारस्य पिंडदापितिविष्णुनोक्तस्य
धनग्रहणवत्वस्य पिंडदानत्वविशेषणस्यापि दृष्टत्वात् एवविषये नियामकत्वांगीकारेण धनग्रह
णाधिकारस्य पत्नी दुहितरश्चैवेत्यादिना पूर्वं पत्न्यास्तदभावे दुहितुस्स्पष्टएवाहुः इदं चार्थद्वारं तत सर्वेषां श्राद्धा
धिकारिणां विशेषणं तथा संस्कृविभक्तासंसृष्टसोदरसत्वे पत्न्याः स्वधनग्रहणेप्यनधिकारात् श्राद्धे
प्यनधिकारः स्यात् तथा च दुहितरसत्वे तत्पुत्रादीनां मातुधनग्रहणेप्यनधिकारात् श्राद्धेनधिकार इति॥ न
वेष्टापत्तिः पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदरः॥ पुत्रेषु विद्यमानेषु नान्यं वै कारयेत्स्वधामित्यादि

वचनेपत्नीपुत्रयोरेवअधिकारस्यप्राप्तत्वात्॥दुहितृभावेदौहित्रः॥तथाचस्मृतिसंग्रहे॥पुत्रःकुर्यात्पितुःश्रा
द्धंपत्नीचेन्नरसन्निधौ॥धनहार्यथदौहित्रस्तद्भ्रातावाथतत्सुतः॥चत्राद्यात्प्रहितान्नातुःसहोदरोभ्राता
तदभावेतुतत्सुतः॥ततस्तुसोदरोभ्रातातदभावेतुतत्सुतः॥दौहित्रोप्येवमेवस्यात्॥पत्न्याभ्रातृराद्येनासोद
रभ्रातृस्वव्याख्यानंनतदकरविरोधात्तत्सुतग्रहणेनचदौहित्रसपत्नीभ्रातृसुतग्रहणेनभ्रातृपुत्रादेरस्य
संततिग्रहणस्यक्रियाप्रसक्तेस्तृपेक्षणीयं॥अत्रयद्यपिधनहारिणएवदौहित्रस्याधिकारः॥प्रतीयते
तथापिकेवलोपिकुर्यात्तथाचविष्णुपुराणे॥अन्यथात्रनस्योपिसुतःपितुःकुर्यात्क्रियांनृप॥उदकाद्यां
मृदावाहेदौहित्रोपितथार्हतीति॥यथात्रतस्यःसुतःपितुःक्रियांकुर्याद्विवसघनद्रोपिदौहित्रोमाता
महस्यकुर्यादित्यर्थः॥अप्यवदितभ्रातृपुत्रस्याप्यभावेपितातततोमातातदुक्तंतत्रैव॥उत्सन्नबांधवंप्रे
तंपितायदित्यर्थः॥अवदितभ्रातृपुत्रस्याप्यभावेपितातततोमातारतदुक्तंतत्रैव॥उत्सन्नबांधवंप्रेतंपि
ताभ्रातापवायजः॥जननीवापिसंस्कुर्यान्मृहदेतोन्यथानवेत्॥इदक्रमोनविवक्षितः॥तद्बोधकस्याभ

श्राद्धादेरभावात्।यत्तुकात्यायननिषेधः॥अपुत्रापापतिर्दद्यात्सपुत्रायानतुकचित्॥नपुत्रस्यपितादद्यान्ना
नुजस्यतथाग्रजइतिसस्नेहविशेषाभावेबोध्यं॥अपिस्नेहेनकुर्यातांसपिंडीकरणं॥विनागयायांनुविशे
षेणजायानपिसमाचरेदिति॥बोधायनोक्तेः॥मातुरभावेस्वसादयः॥तथाचद्वैतनिर्णयेस्मृतिसंग्रहे॥पत्नि
भ्रातुश्चतत्पुत्रःपितामातास्नुषातथा॥भगिनीभागिनेयश्चसापिंडसोदकस्तथा॥असन्निधानेपूर्वेषांउ
त्तरेपिंडदाःस्मृताः॥भगिनीभागिनेयविशेषकात्यायनेनोक्तः॥अनुजावाग्रजावापिभ्रातुःकुर्वीतसंस्क्रियं
नतस्तुसोदरस्तद्वक्रमेणतनयास्तयोरितितदभावेभ्रातृसपिंडमातुलादिः॥तदुक्तंविष्णुपुराणेतेषाम
भावेपूर्वेषांसमानोदकसंततिः॥मातृपक्षस्यपिंडेनसंबद्धायाजनेनवा॥कुलद्वयेपिचोत्सन्नेस्त्रीभिः
कार्यानृपक्रिया॥तत्संघातगतैर्वापिकार्याप्रेतस्यसंस्कृतिः॥तदभावेशिष्यर्त्विगाचार्याः॥तथाचगौतम
पुत्राभावेसपिंडाः॥मातृसपिंडाः॥शिष्याश्चदद्युस्तदभावेऋत्विगाचार्यौ॥तदभावेजामातसस्वाचक्रमेण॥
तदुक्तंमार्कंडेयेन॥सखश्वशुरस्तत्रबंधुश्वसरवाचश्वशुरस्यच॥जामातातस्येहततःकुर्यादित्युक्तंपेतमैथि

श्रा॰म॰
२३

कमिति॥ तरन्नावेस्थी हारी च स्त्री हारी धनहारी च कुर्यात्पिंडं ज्येष्ठक्रियामिति कात्यायनवाक्यात्॥ यस्तार्थ
हरः स पिंडदाता इति विज्ञापस्तं वस्मरण्णच्च॥ उक्ताधिकारिणो मध्ये यदि नः॥ कोपि कर्त्ता तदा तन्नातीयेन
रैः तदीयद्रव्येण तदौर्ध्वदैहिकं तत्स्नाकारण्यं तदुक्तं मार्कंडेयपुराणे॥ सर्वाभावे वनस्पतिः कारयेत्तस्यपि
क्ष्यतः॥ तन्नातीयेर्नरस्सम्यक् दाहाद्याः सकलाः क्रियाः सर्वेषा सर्वेषामेव वर्णानां बांधवो नृपतिर्यतः
अयं चात्र क्रमः॥ प्रथमः पौरसः पुत्रः स त्वनुपनीतोपि कुर्यात्॥ अन्ये नूपनीता एव॥ नाग्निमाहारयेद्ब्र
ह्मपावको नानवधारते॥ मंत्रानुनेपनीतोपि पठेदेवैक औरसः इति सुमंतुस्मृतेः ब्रह्मवेदः॥ अनुपनीत
विज्ञिनष्टि॥ अनुपेतोपि कुर्वीत मंत्रवत्पैतृमेधिकं॥ यद्यसौ कृतचूडः स्याद्यदिस्याच्च त्रिवत्सरः इति॥ य
त्तु॥ कृतचूडस्तु कुर्वीत उदकं पिंडमेव च॥ स्वधाकारं प्रयुंजानो वेदोच्चारं न कारयेदिति व्याघ्रप्रचेतसोर्वच
नं॥ यत्तु॥ कृतचूडोनुपेतस्तु पिंडं श्राद्धं समाचरेच्च तत्॥ उदाहरेत्स्वधाकारं न तु वेदाक्षराण्यसाविति स्मृत्यं
तरं तत्प्रथमवर्षकृत चूडविषयं॥ यत्तु मनुवचनं॥ नह्यस्मिन्युज्यते कर्मकिंचिदामौंजीबंधनात्॥ ना
श्रा॰म॰ २३

भिव्याहारयेद्ब्रह्मस्वधानिनयनादृते इति॥ तृतीयवर्षकृतचूडविषयं॥ यत्तु नयैव व्याघ्रवचनं मनुवचनविरो
धादनादेयमिति कश्चित् प्रथमवर्षकृतचूडविषयत्वात्तस्यानमपि सुमंतुवचनेपरिवत्साच्चिवत्सर इति प्र
चेतु पाठानात्॥ वर्षत्रयात्पूर्वमपि कृतचूडस्य मंत्रवदधिकाराव गमात् प्रयुक्तमित्युक्ते विधेयकर्त्रविशे
षण द्वयस्यापि विवक्षितत्वाद् वर्षकृतचूडस्यैव मंत्रसाधिकरात्॥ त्रिवत्सर इत्यपि प्रचेतुपाठान्नं तु प्रथ
मादिवर्षव्याहृत्यर्थमिति स्पष्टमेव प्रथमवर्षस्याप्यग्निदानमात्रं समंत्रकमन्यत मंत्रकं॥ तथा च कात्या
यनः॥ अथ संस्कृतेनयत्माचत्वग्निदानं समंत्रकं॥ कर्त्तव्यमितरत्सर्वं कारयेदन्यमेव हि इति॥ अत्र कारयेदि
न वंतो बुवंत्विति स्वस्तिवाचनं ॥ सांगं विकिरदानमपसव्येन ॥ तमास्तेतिपश्चः ॥ श्रेषान्नविनियोगश्च दैवपि
त्र्यसाधारणादपसव्येन ॥ सांगं पिंडदानमपसव्येन ॥ अपसव्येन दर्भेषु पिंडदेयात्स्यपस्तु वेइति कार्ष्णाजिनि

राम०
४६

वचनात् ॥ सुप्रोक्षितमस्त्विति श्राद्धदेशप्रोक्षणं कर्मैकसंबंधात्प्राचीनावीतिनैवा अन्नकर्क ॥ आचांतेषूदकपुष्पा
क्षतदानं ॥ तच्चदैवपूर्वं ततोपसव्यं पित्र्ये केचित्तु सव्येनेच्छंति ॥ तत्र ॥ दानसंयोगात ॥ पिंडपितृयज्ञवदुपचार
पित्र्यइति च दर्शनादिति ॥ तस्मूर्वोक्तमरीचिवचनविरोधात्पित्र्याशुद्देशामंतरेण क्रियमाणत्वाच्चोपेक्ष्यं ॥ अ
क्षय्योदकं दैवे सव्येन पित्र्ये वापसव्येन ॥ अघोराः पितरः सन्त्वा उपवीतेन ॥ भाशाप्देन ॥ जपाशीः स्वस्तिवाचन
मिति मरीचीत्युक्तेः ॥ स्वधावाचनं तु सांगापित्र्यत्वात्प्राचीनावीतेन ॥ पात्रस्थार्घ्यसंस्रवसोचनं मुञ्जपात्रो
त्तानीकरणं च प्राचीनावीतीना ॥ तदुक्तंभविः ॥ अपसव्यं ततः कृत्वा पिंडपार्श्वे समाहितः ॥ दिशादर्भपवि
त्राणि मोचयेत्संस्रवेइति पिंडपार्श्वे कलितेदेशाइत्यर्थः ॥ जमदग्निः ॥ सर्वे कर्मापसव्येन यत्किंचिदिह कीर्तितं
विहाय दक्षिणामेकां तथा विप्रविसर्जनं अपसव्यं तु तत्रापि मातुर्हि नगवान्मनेइति ॥ इदं च व्यवस्थितं ॥ ब्रा
ह्मणनामानंत्ययत्तिपक्षे सव्येन ॥ पितृभ्यएवदानमितिपक्षे पसव्येन तविश्वेदेवाः प्रीयंतामिति उपवीतेन
भोजनपात्रचालनं दैवे सव्येन ॥ स्वस्तिवाचनं तूपवीतेन मरीचिवचनात् ॥ विसर्जनं प्रदक्षिणाकरणं च सव्ये

ब्राह्मणरत्नपुष्पाक्षतगंधादिअद्यमेसकलंजन्मेत्यादि॥उच्छिष्टेऽहासनंचलौकिकत्वाउपवीतेन॥यजमान
र्कस्यपत्न्यैपिंडदानस्यपितृसंबंधरादित्वाउपवीतमेवपिंडांस्तुगोजविप्रे॥इत्यादिकाप्रतिपत्तिस्तुपित्र्य
स्यात्माचावीतिनेतिदिक्॥॥अथविप्रनिमंत्रणादि॥॥कौर्म्ये॥॥अस्नोनविप्रानिदिष्टादेपूर्वेद्युरभिपूज
येत्॥असंभवेपरेद्युर्वाब्राह्मणांस्तान्निमंत्रयेत॥यमः॥प्रार्थयीतप्रदोषेतुक्तानग्निपितान्द्विजानिति॥नि
मंत्रणंस्वयमेवकार्यं॥दानाविधान्निमंत्रयेदितिदेमाद्रौदेवलोक्तेः॥असंभवेतुपुत्रादयोपि॥स्वयंशिष्योप
वासुतइतिनैवदद्दस्मृतेः॥कांक्षिन्निषेधितिनारायणः॥अनोज्यंब्राह्मणस्यान्नंक्षत्रियादैर्निमंत्रितं॥
तथैववक्षत्रियादीनांवृषलेननिमंत्रितं॥यमः॥अनोज्यंब्राह्मणस्यान्नंवृषलेननिमंत्रिते॥तथैववृषलस्या
न्नंब्राह्मणेननिमंत्रितं॥नागरखंडे॥कुलाचारमोपेतान्गृहीत्वाचरणौततः॥प्रसादयेन्नसव्येनविश्वेदेवा
र्वनेपुरा॥युग्मानेवयथाशक्त्यामंत्रमेतमुदीरयेत॥आगच्छंतुमहाभागाविश्वेदेवास्तनौतव॥नक्तास्ता
मपाद्येकत्वचापिव्रतभाग्भव॥एवंयुग्मान्समामंत्र्यवैश्वदेवकृतेद्विजान्॥अयुग्मानपसव्येनपित्र्यर्थेचाभि

मंत्रयेत्॥ब्राह्मणांश्चयथाशक्त्याएकैकस्यदैवकदैवक॥एकैकंवात्रयाणांवाप्येकमेवतिमंत्रयेतद्विजंमाताम
हानामप्येवमेवविधिःस्मृतः॥ततःपादौपरिस्पृश्यद्विजस्येदमुदीरयेत॥श्राद्धार्थेनेनमनसापितृन्नक्तिपराय
णः॥पितामेतवकायेस्मिन्तथैवचपितामहः॥स्वपितृसहितोस्मेतुत्वंचव्रतवरोभव॥एवंपितॄन्समामंत्र्य
तथामातामहानय॥सर्वंकृत्वानमस्कृत्यतान्विप्रान्स्वगृहंव्रजेत्॥तत्रैव॥ब्राह्मणानागृहंगत्वातानाशी
विनयान्वितः॥अमुकस्यत्वंपाश्राद्धेक्षणोवैक्रियतामिति॥वदेदस्मपगच्छेयुर्विप्रांश्चैवतपयेत्तिच॥स्वयोपि
वादेरेकन्निशाक्तेतुनवानिति॥द्विजास्तुप्रामवानीतिविधिरेषनिमंत्रणेप्रचेता॥कृत्वापसव्यंस्पृष्ट्वेदुपि
द्विपृवंतुमंत्रयेतनवद्विःपितृकार्यस्वसंपादनःप्रसीदत॥याज्ञवल्क्यः॥द्वौदैवेप्राक्त्रयःपित्र्येउदगेके
कमेववा॥मातामहानामप्येवंतंत्रंवावैश्वदेविका॥वसिष्ठः॥द्वौदैवेत्रयःपित्र्येत्रीनेकैकमुभयत्रवा॥भोज
येत्सुसमृद्धोपिविस्तरेतुविवर्जयेदिति॥विस्तरंनवावराद्भोजयेदपुजोवायथोत्साहमितिगौतमोक्तेः॥
तस्यत्वसंतरामहद्धोधिकांरात्सर्पः॥अनेकविप्राभावेत्वेकमपिभोजयेत॥भोजयेद्यवाप्येकंब्राह्मणंपं

श्रा·म·
५८

क्षिपावनमितिशंखोक्तेः॥ अत्र वैश्वदेवप्रकारमाह स एव॥ यद्येकं भोजयेच्छ्राद्धं दैवं तत्र कथं भवेत्॥ अन्नं पात्रे
समुध्दृत्य सर्वस्य प्रकृतस्य तु॥ देवतायतने कृत्वा यथाविधि निवेदयेत्॥ प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्म
चारिण इति॥ चतुर्विंशतिमतेपि॥ विप्राभावे तु पात्रस्याद्यात्र भोजयेदिवेति॥ अत्र विशेषो मात्स्ये॥ तं पं
क्तिमंत्रनियमान् श्रावयेत्पैतृकान् बुधः॥ अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः॥ भवितव्यं भवद्भिश्च
मया च श्राद्धकारिणेति॥ जातूकर्ण्यः॥ निरामिषं सकृदुक्तं नुक्तं सर्वजने गृहे॥ निमंत्रयीत पूर्वेद्युरुपगम्य
द्विजोत्तमान्॥ आदित्यपुराणे॥ नरहस्तु शुचिर्भूत्वा क्रोधनो त्वरितान् भवेत्॥ अप्रमत्तः सत्यवादी यजमानो
यवर्जयेत्॥ अध्यानं मैथुनं चैव श्रमं स्वाध्यायमेव च॥ अत्राहरार्ष्टेन निमंत्रणप्रभृति भुक्तान्नपरिणा
मावधिकालोऽभिहितो॥ स्मार्त्तपरिणामांतं ब्रह्मचर्यं द्वयोस्तत इति प्रचेतः स्मरणात् वृद्धमनुः॥ निमं
त्रितांस्तदहर्वर्जयेन्मैथुनं क्षुरं॥ क्षुरं क्षुरकर्म॥ एतच्चनखनिकृंतनादेरप्युपलक्षणमिति हेमाद्रिः॥ जा
बालिः॥ तांबूलं दंतकाष्ठं च स्नेहस्नानमभोजनं॥ रत्यौषधपरान्नानि श्राद्धकृत्सप्त वर्जयेत्॥ प्रचेताः॥ श्राद्ध

राम·
५८

भुक्तान्नस्यायन्नकुर्याद्दंतधावनं श्राद्धकृन्नैव कुर्वीत रंतप्रक्षालनं बुधः॥ विष्णुः॥ कोपं परिहरेन्नाक्रयान्
येन्नत्वरां कुर्यात्॥ निमंत्रितन्निजपरित्यागे दोषं प्रायश्चित्तं चाह नारायणः॥ केतनं कारयित्वा तु यो निवार्य
ति दुर्मतिः॥ ब्रह्महत्यामवाप्नोति शूद्रयोनौ च जायते॥ एतस्मिन्नेन निमित्ते ब्राह्मणो नियतः शुचिः॥ यति चां
द्रायणं कृत्वा तस्मात्पापात्प्रमुच्यते॥ केतनमामंत्रणं हारीतः॥ दैवे वाथ पित्र्ये वा पित्र्ये निमंत्र्य ब्राह्मणं पतित
र्पयेन्न यथान्याय्यं स तत्तस्य फलं हरेत्॥ प्रमादाद्विस्मृतं ज्ञात्वा प्रमाद्यैनं प्रयत्नतः॥ तर्पयित्वा द्विजो येण
सर्वतः फलमाप्नुयात्॥ गौतमः॥ सद्यः श्राद्धी शूद्रात्यगस्तत्पुरीषे मासं नयते पितॄन्॥ श्राद्धं करिष्यमा
णं॥ कृतं वास्य विद्यते इति श्राद्धीदात॥ समस्तलक्षणमारभ्य एते च नियमा आवश्यकाः॥ तदुक्तमग्निपुरा
णे॥ अमैथुनादयः सर्वे नियमाः श्राद्धकारिणः॥ अथ प्रमत्तेन कर्तव्या प्रमादाद्यन्निरयं व्रजेत्॥ अशक्ताव
न्येन क्रियमाणे श्राद्धे उभाभ्यामपि कर्तव्या इत्युक्तं वाराहपुराणे॥ न शक्नोति स्वयं कर्तुं यथा स्नानव्रता
न्नतः॥ श्राद्धं पुत्रेण शिष्येण तदान्येनापि कारयेत्॥ नियमानाचरेत्सोपि विहितान्सर्वशो घरे॥ यजमा

नोषितात्सर्वस्माच्चरेत्सुसमाहितः॥ब्रह्मचर्यादिनिर्द्दिष्टैर्नियमैः श्राद्धमक्षयं॥अन्यथाक्रियमाणंतुमोघसे
वनसंज्ञायइति॥कात्यायनः॥अनिंद्येनामंत्रितोनापक्रामेत्॥अनिंद्येनोज्यान्नेननिमंत्रितः॥निसंक्रम
णनापक्रामेत्ननेच्छेत्॥किंत्वेसुपगच्छेद्देवात्यावग्रातपथेतस्मात्तुहानियस्पष्टतोनापक्रामेदितिगौ
तमः॥अनिंद्येनामंत्रितेज्ञज्ञाकेनद्रस्याख्याव्येकर्त्तव्यमिति॥अनेनार्थान्निद्यामंत्रणेभोक्तुमसामर्थ्येवच
त्याख्येयमितिगम्यते॥षट्त्रिंशन्मते॥विद्यमानधनोविद्वान्नोज्यान्नेननिमंत्रितः॥कथंचिदप्यतिक्रा
मन्नायःसूकरतांव्रजेत्॥अनेननिर्द्धनस्यबहुदक्षिणादिलाभलोभात्कदाचिदतिक्रमेनदोषइतिगम्य
ते॥कात्यायनः॥आमंत्रितोन्यदन्नेनप्रतिगृह्णीयात्अन्यत्॥अन्यदीयस्याद्योपत्क्रमंतंडुलादिद्र
व्यमष्टान्नेनप्रतिगृह्णीयादितिकर्क॥श्राद्धीयव्यतिरिक्तस्यापिनिषेधइत्यन्ये॥यमः॥अहिंसासत्यम
क्रोधोदूरेचागमनक्रिया॥भ्यारोहदहनंशांतिःश्राद्धस्योपासनेविधिः॥दूरेसीमांतःपरस्तात्॥तथाब्रह्मां
डपुराणे॥नसीमानमतिक्रामेच्छ्राद्धार्थंवैनिमंत्रितः॥पर्यटन्ग्राममध्येतुनकदाचित्वहुव्यतियमःपु राम॰ ४९

नर्त्तेजिनमध्यानंनाराध्यायनमैथुनं॥संध्यांप्रतियदंहोमंश्राद्धंतुवर्जयेत्सदा॥होममन्येनकारयेदि
त्यादकात्यायनः॥सूतकेचप्रवासेचअशक्तौश्राद्धभोजने॥एवमादिनिमंत्रेषुहावयेदितियोजयेत्॥
अन्यस्यस्पष्टोहेतुरस्मान्नेनविष्णुपुराणउक्तं॥दग्नाहृत्वःपिवेदापोगायत्र्याश्राद्धंतुद्विजः॥ततःसंध्यामुप
सीतजपेच्चजुहुयादपि॥मंडलमुक्तंमत्स्यपुराणे॥भवनस्याग्रतोनु[illegible]गोमयेनातुलिप्तायांगोमूत्रे
णतुमंडले॥इतिलिप्ताग्रामितिसामान्यतःसर्वकामागितयाघाम[illegible]द्यते॥गोमूत्रसहितेनगोमयेन
गोमयेनमंडलेकार्येइतिशेषः॥शंखः॥उदकल्पवसुदीच्यंस्यादक्षिणंदक्षिणाप्लवमितिमंडलमितिशे
षः॥तत्रउदीच्यमुदक्प्लवंदैवं॥दक्षिणंदक्षिणाप्लवंपित्र्यमितिअवस्थाबोधायनः॥प्रदक्षिणंतुदेवानां
पितृणामप्रदक्षिणं॥देवानामृतजवोदर्भाःपितृणांद्विगुणास्मृताः॥तपः॥उदस्युरवदेवानांपितृ
णांदक्षिणामुखः॥कात्यायनः॥दक्षिणंपातयेज्जानुंदेवान्परिचरेन्सदा॥पातयेदितरंजानुंपितॄन्प
रिचरेन्सदेतिमंडलयोविशेषमाहशंखः॥अंतरेत्ततसंयुक्तान्पूर्वाग्रान्विन्यसेत्कुशान्॥दक्षिणे

दक्षिणाग्रांस्तुसतिलान्विन्यसेद्बुधःइति॥मात्स्ये॥नामगोत्रपितॄणंतुप्रापकंहव्यकव्ययोरिति॥तथा॥याद्यैर्दै
वतयाचार्घैर्देवमार्हैःप्रयोजयेत्॥शन्नोदेवीतिमंत्रेणपाद्यंचैवप्रदापयेत्॥आदित्यपुराणे॥विप्रौतुप्राङ्मु
खौतेभ्योहैमंतुप्रवंनिवेदयेत्॥उत्तराभिमुखान्विप्रान्नोत्पितॄन्सर्वदेति॥सुमंतुः॥दर्भपाणिर्द्विराच
म्यलघुरासाजितेंद्रियः॥परिश्रितेषुचौरेदेशेगोमयेनोपलेपिते॥दक्षिणाप्रवणेसम्यक्आचांतान्प्र
क्षालितान्शुचीन्॥आसनेषुसदर्भेषुविविक्तेषूपवेशयेत्॥मरीचिः॥तथामातामहश्राद्धंवैश्वदेवसम
न्वितं॥कुर्वीतभक्तिसंपन्नस्तंत्रंवावैश्वदेविकमिति॥अथचपितृमातामहपार्वणयोरेकःप्रयोगःद्वयमे
तिपक्षद्वयं॥आद्यपक्षेवैश्वदेविकंतंत्रंनान्यदिति॥पैठीनसिरितिमाधवाचार्यः॥उपवेशनोत्तरंविप्राणांध
र्मनिराह॥मनुः॥आमंत्रितोवसेदेग्धीमुपहूयेसुरिघामिति॥हिंकृएवतिमितिवायत्तुहेमाद्रिः॥आ
बाह्मणइस्यादीनिपर्जन्यपिरसेहनवाचयूपदोषेतानिजपेदिति॥नन्न॥स्वालिंगनिर्देशेनकृत्वपादाना
त्॥साप्येकाकाचित्॥एकवचनात्॥निषंगणस्कत्रयः॥यजूंष्यपितत्रजप्यानि॥निषगिणः॥इंद्रद्रुप

यागेतिसहपुदस्तोरितिचरुकं॥नमःकृत्स्नवीतायनमोवंचतेइत्यादीनिच॥गोभिलः॥आमंत्रितोजपेद्दोहानि
पुर्कस्तुपश्नानुजपेत्॥अत्रीषंगांश्चतत्रैवजस्वाध्यायाद्विजोमः॥क्षपणानीषंगादीनिछंदोगेषुप्रसिद्धानि
मरीचिः॥विप्रपाणयःसर्वेतेचमौनव्रतान्विताइति॥यमः॥ब्राह्मोपासकयाकुर्युःविद्वत्यमेतदीप्सित
मिति॥सएवत्रिणुःब्रह्मचारीभोजनार्थमुपस्थितः॥उपविष्टेष्वयश्राद्धकामंतमपिभोजयेदिति॥विष्णु
पवेशनोत्तरकृत्यपुराणे॥श्राद्धमेगयांध्यात्वाध्यात्वादेवंजनार्दनं॥ताभ्यांचैवनमस्कृत्यततःश्राद्धं
प्रवर्तयेत्॥तुस्थानेस्थपितृध्यात्वेतिवाचस्पतीयःपाठः॥तथा॥उशनोहस्तोसमौक्ताजानुभ्यांमंतराल्लितो
सप्रयतःश्रोपविष्टान्सर्वान्निप्रच्छेद्विजोत्तमान्॥श्राद्धंकरिष्यइतिपृच्छेदित्यर्थः॥ततोविप्राःकुरुष्वेत्यनु
ज्ञांब्रूयुः॥एतदनंतरंकृत्यंब्रह्मांडपुराणे॥देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच॥नमःस्वाहायैस्वधा
यैनित्यमेवनमोनमः॥आद्यवसानेश्राद्धस्यत्रिरावृत्तंजपेत्सदेति॥अंपंचजपःसंकल्पोत्तरमात्रादानो
त्तरंवाकायःशिष्टास्त्वादौत्तरमेवकुर्वंति॥ततःकर्तव्यनिगमे॥अपहताइतितिजानविकिरेदिति॥एत

श्रा॰म॰ न्नविकिरणं नयान्वाकार्यमिति केचित्॥ अनंतरकृत्यमाह याज्ञवल्क्यः॥ पाणौ दत्ता जनं कृत्वा विष्टरार्थान्
५१ कुशानपीति॥ पुराणे॥ आसने चासनं दद्यात् वामे वा दक्षिणे पिवा॥ पितृकर्मणि वामे वै दैवे कर्मणि दक्षिणे
॥ दैवे दद्यासि यवा॥ दैवानां सयवा दद्यादिति कारिकोक्तेः॥ ततः स धर्मके द्वितीयनिमंत्रणमुक्तं संग्रहे ततः
पुनरपो दत्वा निमंत्रयेत्॥ दैवे क्षणः क्रियतां तत्तस्येति विप्रो ब्रूयात् प्राप्नोतु भवानिति कर्ता पुनर्ब्रूयात्त्वा
म वानिति विप्रः पुनः ब्रूयात्॥ अथ विशेषः पुराणे निरंकुशं गृहीत्वा तु विप्रान्देवान्समाह्वयेत्॥ गृहीत्वेत्य
स्यानंतरं निमंत्र्येति शिवइति माधवः॥ आवाहने विशेषमाह यमः॥ यवैरस्तीर्य ततो देवानह्यावाहनं कु
र्यात्॥ आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा॥ विश्वे देवाः शृणुतेति मंत्रं जपेत्ततोंजलिना॥ ओषधय इति
मंत्रेण विकिरेत्तु प्रदक्षिणं॥ पादादिमस्तकांतमक्षतानारोपयेदित्यर्थ इति माधवः॥ अत्र श्राद्धभेदेन वि
श्वेदेवव्यवस्थामाह व्याघ्रः॥ इतिश्राद्धे क्रतुर्दक्षसंज्ञौ स्मृतौ विश्वेदेविके॥ नांदीमुखे सत्यवसू काम्ये च धूरि राम॰
लोचनौ॥ पुरूरवार्द्रवौ चैव पार्वणे समुदाहृतौ॥ नैमित्तिके कामकालौ एवं सर्वत्र कीर्तयेदिति॥ धुरिलोच ५१

नाविति क्वचित्पाठः॥ अत्रेष्टिश्राद्धं वृद्धिश्राद्धेन पारिभाषिकं कर्मांगश्राद्धमुच्यते॥ तत्राह पारस्करः॥ निषेककाले सो
मे च सीमंतोन्नयने तथा॥ ज्ञेयं पुंसवने श्राद्धं कर्मांगं वृद्धिवत्कृतमिति॥ निषेको गर्भाधानं॥ तथा चाधानसो
मयागनिषेकादित्रयसंस्कारादिष्वत्र श्राद्धे क्रतुर्दक्षाविति हेमाद्रिमाधवौ॥ अत्र नात्वचरणः॥ इष्टिश्राद्ध
ष्टेन कर्मांगश्राद्धं यद्वृहणे प्रमाणान्नावाहनं सा फल्गायनाप्यकारमते पावमानेष्टीनां समप्राधान्यपक्षे अ
धानांगमेव श्राद्धं न्यूस्यतोतस्यापि कथंचिदिति॥ जन्माद्यवनीयादिकृयोष्टीनां समप्राधान्यपक्षे आधानां
गमेव श्राद्धं तस्येवेनेष्टिश्राद्धत्वात्॥ यद्दपप्रयोगपारिजाते॥ यस्मज्जाताः प्रमायेरन् पुत्रास्तेन न वंति वा॥ सत्तु का
लेरिने षष्ठे दंपती समलंकृतौ॥ कृतान्युदयिकं श्राद्धं स्वस्तिवाचनपूर्वकमित्यादिना विहितपुत्रकामेष्ट्यंग
न्तं श्राद्धं तु यत्॥ अस्मिन्पक्षे आधानांगश्राद्धं नांदीमुखवसत्यवसुसंज्ञौ विश्वेदेवाविति युक्तमुत्पश्यंति नैमि
त्तिकं च न वान्नलाभनिमित्तकं॥ न वान्नलाभे द्वौ देवौ कामकालौ सदैव हि॥ स्यादिष्टपुराणीयेतउपमं ह्यगत
तेनन वान्नलाभ इति निमित्तानिकारक्रियमाणरारूपराग्गदीनामपलक्षणमिति हेमाद्रिमतं निरस्तंपि

श्राम. ५२

तुनकान्नवान्नमेन्ननाम्नूर्वंक्रियमाणंनैमित्तिकमितिवस्मृतिचंद्रिकायां॥एकोद्दिष्टंतुयच्छ्राद्धंतन्नैमित्तिमुच्यतेइ
तिपरिभाषितत्वेपितस्यदेवहीनत्वान्नग्रहणं॥अतएवसपिंडीकरणश्राद्धस्यएकोद्दिष्टपार्वणोभयरूपत्वेन
विश्वेदेवसत्वान्नग्रहणमितिकेचित्॥एकोद्दिष्टस्यापिपार्वणरूपेणक्रियमाणंसांवत्सरिकमितिकेचित्पि
तृपक्षेचतुर्दश्यामेकोद्दिष्टेविश्वेदेवसत्वान्नग्रहणमितितुयुक्तंप्रतिभाति॥आदित्यपुराणे॥अपिकन्यागते
नैरपेक्ष्येचधुरिलोचनौ॥कन्यागतस्ययेनिमित्तकृत्यविहितेभाद्रपदापरपक्षइतिहेमाद्रिः॥कन्यासंक्रां
तिनिमित्तकएवेतितुयुक्तं॥आमन्त्रणानोत्तरंचार्घपात्रासादनंकार्यं॥तदाहयाज्ञवल्क्यः॥यवैरन्ववकीर्या
थभाजनेसपवित्रके॥शन्नोदेव्यापयःक्षिप्त्वायवोसीतियवांस्तथेतिमात्स्ये॥विश्वान्देवान्यवैःपुष्पैरभ्य
र्च्यासनपूर्वकं॥पूरयेत्पात्रयुग्मंतुस्थाप्यदर्भपवित्रकइति॥अर्घ्यदानमधिकृत्यकात्यायनः॥सौवर्णरा
जतौदुंबरखड्गमणिमयानांपात्राणामन्यतमेषुयानिवाविद्यंते॥पत्रपुटकेवेति॥यानिकांस्यादीनि
॥अत्रराजतंपित्र्यएवनतुदैवे॥शिवनेत्रोद्भवंयस्मात्तस्मात्पितृवल्लभं॥अमंगलंतद्यत्नेनदेवकार्येषु श्राम. ५२

वर्जितमितिमत्स्योक्तेः॥प्रतिपात्रेचपवित्रद्वयेस्थाप्यं॥तथाचचतुर्विंशतिमते॥द्वेद्वेशलाकेदेवानांपात्रेकृत्वाप्र
क्षिपेत्॥योगयाज्ञवल्क्यः॥विविक्तेस्थइतिमंत्रेणद्वेपवित्रेचकारयेत्॥गायत्र्यास्वाहेतिचैवदेवानामिति॥अर्घ्यप
त्रस्थापनेसोमंत्रीन्नुदगनेइतिमाधवः॥सव्येनदत्वाहस्तेपवित्रेतुसंपूज्यार्घ्यंविनिक्षिपेदिति॥याज्ञवल्क्य
॥यादिव्याइतिमंत्रेणहस्तेष्वर्घ्यंविनिक्षिपेदिति॥अर्घ्यदानोत्तरकृत्यमाहसएव॥दत्वोदकंगंधमाल्यधूपद
नंसदीपकं॥अत्रगंधादिग्रहणंवाससोप्युपलक्षणमितिमाधवादयः॥एवमासनादीन्वासोन्तान्वैश्वदे
विकदानानिकांडानुसमयेनकृत्वापवित्रेपित्र्येपितृस्यैवातान्कुर्यात्॥तथाचयाज्ञवल्क्यः॥अपसव्यंततः
कृत्वापितृणामप्रदक्षिणमिति॥अत्रततःइत्यनेनवैश्वदेविकपदार्थकांडोत्तरंपित्र्यर्चनविधानात्कांडा
नुसमयोगम्यतइतिमाधवविज्ञानेश्वरादयः॥आसनादिदानेतिकर्तव्यतामाहसएव॥द्विगुणांस्तुकु
शान्दत्वाह्युशंतस्त्वेत्यृचापितॄन्॥आवाह्यतदनुज्ञातोजपेदायंतुनस्ततः॥पूर्वमनंतरंवापादेयाः॥अप
हतर्नान्द्विगुणान्तुभुग्नानासनंप्रदापायःश्राद्धेसांख्यायनोक्ते॥कुशैःसहतिलाआपोदेयाः॥तथा

श्रा॰म॰ ५३ चकारके पितॄणां द्विगुणास्तिलैरिति ॥ सहार्येतिलैरितितृतीया ॥ आवाहने तिलविकरणे विशेषमाह ब्र
चेताः ॥ शिरःप्रभृतिपादांतं तमोवः इति पैतृके इति ॥ चतुर्विंशतिमते च अर्घ्यपात्रं विधायैव ब्राह्मणान्पू
जयेत्ततः ॥ विश्वेदेवास्तु पादादि शिरआदि पितामहा इति ॥ जपानंतरं विशेषः ॥ पुराणे जपेदायंतु न इति
मंत्रं सम्यगन्वेषतः ॥ रक्षार्थं पितृसत्रस्य त्रिः कृत्वा सर्वतो दिशं ॥ तिलांस्तु प्रक्षिपेन्मंत्रं मुक्त्वा पपि हता इति ॥
अर्घ्यदानाद्यादत्ते योवक्ष्यः ॥ यवार्थस्तु तिलैः कार्यः कुर्याद्धार्घादि पूर्ववत् ॥ दत्वार्घं संस्रवांस्तेषां पात्रे कृत्वा
विधानतः ॥ पितृभ्यः स्थानमसीति न्युब्जपात्रं करोत्यधेति ॥ अर्घ्यपात्राणामासादनप्रकारमाह विष्णुः दक्षि
णाग्रेषु दक्षिणापवर्गेषु वसनेषु त्रिषु पात्राणि सिंचेच्छन्नोदेवीति ॥ अर्घ्यपात्रेषु पवित्रांतर्हितेषु जलं प्रक्षिप्य त
त्र तिलामंत्रेण प्रक्षेप्याः ॥ तथाचाश्वलायनः ॥ पात्रेषु दर्भांतर्हितेषु अपः प्रदाय शन्नोदेवीरभिष्टय इत्यनुमंत्रित
सु तिलानावपति ॥ तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नवद्भिः प्रत्तः स्वधया पितृतिमांल्लोकान्प्री रम॰ ५३
णाहि नः स्वधा नम इति अस्मादेवस्त्राछन्नोदेवीरिति मंत्रो मिमंत्रेण एवाश्वलायनीयानां अन्येषां तु

जलप्रक्षेपे करणं ॥ अर्घ्यपात्राणि पितृसंख्ययैव न तु विप्रसंख्यया तेन पित्रादीनामेकैकस्थाने कवि
प्रपक्षे पित्र्ये एवार्घ्यपात्राणि ॥ स्त्रीत्वपि पितॄणां त्रीण्येव कुर्यात्पात्राणि धर्मवित् ॥ एकस्मिन्वा बहुषु वा
ब्राह्मणेषु यथाविधानि वैजवापोक्तेः ॥ स्त्रीत्वं कुशानास्तायैत्स्यर्घः ॥ अर्घ्यपवित्राणि कार्याणि ॥ तिस्रस्ति
स्रशलाकाः स्युः पितृपात्रेषु पार्वणे इति चतुर्विंशतिमतात् ब्रह्मपुराणे ॥ अर्घाः पुष्पैः सगंधैश्च ताः प्र
दातव्यं मंत्रवदिति ॥ अर्घ्यः आपः अर्घ्यदानप्रकारमाहाश्वलायनः ॥ ताः प्रतिगृह्णाति पिष्वंस्वधार्याइति
॥ ताश्चापो ब्राह्मणहस्ते पूरकपूर्वकं दद्यात् ॥ प्रदापोदकपूर्वमर्घ्यं दद्यादिति याज्ञवल्क्योक्तेः सावेतत्ते
अर्घ्यादिकमिति अपउपस्पृश्यो वमेतरयोरिति ॥ एवं विप्रहस्ते अर्घ्यं दत्वा तेभ्यो हस्तेभ्यः पात्रांतरेभ्युतान्संस्रा
वान्प्रथमे अर्घ्यपात्रे गृहीत्वा तत्पात्रं न्युब्जमधोमुखं पितृभ्यः स्थानमसीति मंत्रेण कृत्वा तथैव स्थापयेदि
त्यर्थः ॥ आरनेस्तु संस्रवत्स्यादिति न्युब्जतापात्रस्यानामयांग्रहणमित्याह ॥ अत्राचाराद्यावरस्थानां न्युब्ज
पात्रस्थापनानंतरं विशेषमाह वैजवापः ॥ तस्योपरि कुशान्दत्वा प्रदद्याद्दैवपूर्वकं गंधपुष्पाणि धूपं च दी

श्रा॰म॰ पंचस्योपवीतकमिति॥ आसनं॥ सपवित्रकरेणं गंधैर्गंधद्वारेति पूजयेत्॥ धूपं च धूरसीत्युक्त्वा दीपोज्योति
५४ रिदं चतेन यत्तु ललाटे पुंड्रकं दृष्ट्वा स्कंधे माल्यं तथैव च॥ निराशाः पितरो यांति दृष्ट्वा वृषलीपतिमिति त
द्वत्तुलानिधायमितिहेमाद्रिः॥ माल्यमपि द्विस्त्रायां धार्यं न स्कंधे॥ विष्णुः॥ घृतेन दीपो दातव्यस्तिलतैलेन
वा पुनः॥ अत्रिः॥ पुंवं वस्त्राणि मनेन दद्याद्वासांसि त्राक्तितः॥ शातातपः॥ पुंवांसु वासा इति वस्त्रं दद्यात् दत्त्वा दे
यज्ञोपवीतमिति॥ अन्नं दैवपूर्वकमित्यनेन गंधादीनां देवे पित्र्ये च पदार्थानुसमयेन अनुष्ठानं गम्यते॥
आसनादीनामाछादनांतानां सर्वेषामेव पदार्थानुसमयः कांडानुसमये वेत्युक्तं स्मृत्यर्थसारे माधवी
ये च॥ ॥अथाग्नौकरणं याज्ञवल्क्यः॥ ॥अग्नौ करिष्यन्नादाय पृच्छेदन्नं घृतप्लुतं॥ कुरुष्वेत्यभ्यनुज्ञातो कु
त्वाग्नौ पितृयज्ञवत्॥ एतत्पदेन गणकादिपरिसंख्येति विज्ञानेश्वरः॥ पितृयज्ञवदित्यनेनाग्निमुपसमाधा
यमेक्षणेनावदाय सोमाय पितृमते स्वधा नमोग्नये कव्यवाहनाय स्वधा नम इति कृत्वा मेक्षणं चतुरु
पादिस्येतावदतिदिश्यते ततः॥ शेषमन्नं पितृपात्रेषु दद्यान्नतु वैश्वदेवपात्रेषु॥ शेषस्येति स्पष्टत्वात्॥ अत्र राम॰ ५४

त्रामावास्यायां हेमाद्रौ दन्वयाग्रापर्यविदितं दक्षिणाग्निसद्भावात्तत्रैवाग्नौकरणं कार्यं॥ अन्यश्राद्धेषु तदध
द्वाग्निनः केवलस्मार्ताग्निमतश्चैवायासने॥ तथा च विष्णुधर्मोत्तरे॥ आहिताग्निस्तु कुर्यात् दक्षिणाग्नौ समाहि
तः॥ अनाहिताग्निश्चौपसदेऽग्न्यभावे द्विजेऽप्सु चेति औपसदोगृह्याग्निः॥ कात्यायनः॥ अग्नौकरणहोमेतु य
दृष्टितियन्मतं॥ सयदान्यां समायेस्याछाद्रिंन्यो विधिस्तदेति॥ केचित्तु अग्न्याधानरत्वात्कर्मस्मार्तं विवाह
स्माविस्तु परेद्योन पितृयज्ञवदित्यतिदेशाद्वाधादक्षिणाग्निसद्भावेप्यौपासनपक्षमाहुः॥ तन्न॥ उपदेशस्यौ
पासनहोमादिषु सावकाशतयाविरोधाभावेनन्यगतिकवाधस्यान्याय्यत्वात् वाचनिकानिदेशस्योपदे
शतुल्यत्वात्॥ अपरार्कस्तु पितृयज्ञवदितिदेशस्यसामान्यवचनं कर्मस्मार्तमितिरूपदेशसामान्यवचनानुसंधेन द
क्षिणाग्निव्यतिरिक्तपाकतत्पदार्थविषयमतो द्वैधानेनगृह्यसद्भावेनतत्रहोमः॥ अन्नाद्वेतु दक्षिणाग्नौ तथा
च वायुपुराणे॥ अहूत्यदक्षिणाग्निं तु होमार्थं वै प्रयत्नतः॥ अग्न्यर्थं लौकिके वापि जुहुयात्कर्मसिद्धयः इति
॥अत्र स्मर्यमित्यनेन गृह्याग्निकार्ये दक्षिणाग्निविधानेन गृह्याभावे दक्षिणाग्निविधिरिति॥ तन्न॥ कार्ये विधे

श्रा.म. फलचसमेनेवसोमस्यरूनैरिवचकुरुणानांगृह्याग्निसत्वेपिदक्षिणाग्निनातद्बाधस्यैवोचितत्वात्॥ वस्तुत
५५ स्तु॥ अग्न्यर्थमित्यनेनैकदेशाबाकोपात्तदक्षिणाग्निकार्य एव लौकिको विधीयत इति प्रकृते॥ यदपि स्मार्त्ते
कर्मविवाहाग्नाविव्स्याद्बाधायथाहिताग्निस्तु कुर्यादिति वचनं स्वविधानेन गृह्याग्न्यभावे दक्षिणाग्नि
विधानपरमिति॥ तदप्युक्तं॥ विशेषविषयेऽपवादविषये चोत्सर्गस्याप्रवृत्ते॥ लौकिकपदेन गृह्य
ग्निरेव॥ न पैतृयज्ञियहोमे लौकिकेऽग्नौ विधीयत इत्यसंस्कृतस्य निषिद्धत्वादिति हेमाद्रिः॥ तन्न पैतृय
ज्ञियपदस्य पिंडपितृयज्ञांगत्वेन होमपरत्वात्॥ तत्र चेदं साप्यप्राप्तस्याग्निप्रतिनिधित्वमात्रस्यानुवाद
कं वायुपुराणादिवचनप्राप्तनिषेधकं वा अनग्निकस्य स्वविधानेन त्वासंस्कृतं लौकिक एव॥ हस्तेऽग्नौ
करणं कुर्याद्यग्नौ वा साग्निको द्विज इति पराशरवचनादिति वृत्तिकारादयः परे त्वेतद्वचनमग्न्यसन्निध
नपरमित्याहुः॥ यत्तु धूर्तस्वामी आपस्तंबानां मासिकश्राद्धस्यापूर्वत्वेन पितृयज्ञाद्दक्षिणाग्नेरप्राप्त श्रा.म.
त्वात् स्मार्त्तस्य चाग्न्यभावेन स्वविधानेनोधिकरणाभावाद्धोमलोप इति॥ तन्न॥ पितृयज्ञधर्मकत्वाभावेपि ५५

स्मृतिवचनेन दक्षिणाग्नेः पाणिलौकिकान्यारेप्राप्तिसंभवात्॥ आश्वलायनानामन्वष्टक्यं च पूर्वेद्युर्माघि
मास्यथ पार्वणं॥ काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमं॥ साग्नेर्यग्निषु साग्नीनां वह्नौ होमो विधीयते
पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपीति परिशिष्टा॥ विरुक्तदक्षिणाभावे विधत्य होमः॥ कार्य इति हेमा
द्रिः अनेनैव न्यायेन सर्वश्राद्धेषु दक्षिणाग्निविदिरणं कर्त्तव्यमिति युक्तमुत्पश्यामः॥ यमः॥ अग्न्यभा
वे तु विप्रस्य पाणावेवोपपादयेत्॥ यो ह्यग्निः स द्विजो विप्रैर्मंत्रदर्शिभिरुच्यते॥ अत्राभावो नाम परि
ग्रहाभावेन तदुत्तरकालिकाग्निस्वीकाराभावेन स्वीकृतोत्सेदेन वाग्न्यसंनिधानेन वेति केचित्तु भार्याप
रिग्रहाभावेनैवेति वदंति अग्न्यभावे तु विप्रस्य पाणौ दद्यात्तु दक्षिणे अग्न्यभावः स्मृतस्तावद्यावद्भार्या
न विंदतीति गार्ग्योक्तेः॥ संनिवत्वेवाग्निसंबंधे भावप्रतिवचनुप्रोक्तमितिमत्वा साग्नेरेव कदाचिदग्न्य
संबंधाने पाणिविधिरिति जयंतस्वामी॥ शूद्रस्याममश्राद्धे तेनाग्नौ करणं कुर्यादित्यनेनाग्नौकरणवि
धानात्तत्र त्वेवाग्न्यभावे पाणिविधिरिति केचित्॥ वस्तुतस्तु॥ पाणावेवेत्येवकारेण यत्र लौकिकाग्नि

श्रा॰म॰ जलाद्यपिकरणं तरनिरनिराकरणं तत्रार्यपरिग्रहानावहृते अन्यत्र तु पाणिरपीति गर्ग्यवचनात्पा
विप्रश्राग्नेष्वधिःकरणस्यायेन प्रहृतएव॥ कात्यायनः॥ अनग्निको यदा विप्रः श्राद्धं कुर्यात्तु पार्वणं॥ अ
५६ ग्नौकरणवत्तत्र होमो दैवकरे भवेत्॥ उपवीतस्याहकरादि दैविकधर्मेण जुहुतामिदमिति देमाधि
देवस्यकरइति समासः॥ विवक्षितैकवचनत्वादेकस्यैव॥ तदुक्तं वायुपुराणे॥ दैवदैवे यदैकस्मिन्नवे
पुर्वद्विवो द्विजाः॥ नदैकपाणौ हुतं यस्माद्विधिविहितस्तथा॥ स्वधाकारादिपितृधर्मिणा तु कात्यायनः
पित्र्ये यः पंक्तिमूर्द्धन्यस्तस्य पाणावनग्निकः॥ हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत्॥ यत्तु हेमाद्रौ
अग्नौकरणवत्कुर्याद्विजातौ वैश्वदेविके॥ पाण्यवेव तु तद्द्यात्तु पित्र्ये करात्त्वनेति॥ तदैव पाणिस्कन्य
र्थं॥ अथवा दैवे हुत्वा न पुनः पित्र्ये कर्त्तव्यमित्येतदर्थं॥ यत्तु वामावास्याश्राद्धादिषु नैकपार्वणतंत्रता
तत्र पार्वण्णं तरसाकुल्यार्थं नैरेनानुष्ठानं॥ ब्राह्मणैकेनानंतत्रेण वदे वेष्येवमेव तद्दकात्यायनः मनाम रा॰म॰
दस्यनेदेपिकुर्यात्तंत्रेण सामिक इति मत्स्यपुराणे॥ अस्यनावे तु विप्रस्य पाणावेव जलेपि वा अनंक ५६

ऽग्निकर्णे वा गोष्ठे वायग्निवांतिके॥ वं.र.॥ अप्सु चैव कुर्यात्तं चे अग्निकात्यायनो ब्रवीत्॥ रजतेचसुव
र्णे च नित्यं वसति पावकः॥ सौरपुराणे॥ महादेवस्य पुरतो गोष्ठे वा श्रद्धयान्वितः इति॥ स्मृत्यर्थसारे
पिपाणि होमे इध्ममेक्षणविप्राग्न्यनुज्ञानसंति॥ पित्र्यविप्रपाणिं परिसमुह्य पर्युक्ष्य वामेनोपस्तीर्य
दक्षिणेनावदाय जुहुयादिति कर्कस्मृतिचंद्रिकादौ केचित्तु उक्तयोर्विरोधाभावादनग्निद्विजस्य दातामं
वत्स्वेवाग्नौकरणमिति पूर्वविकल्पावितिवेगन कोक्ते विप्रानुज्ञात्रासामेक्षणमप्युपादेयं॥ अवदानरू
पकार्यसत्वात्॥ कार्येन्यस्य विध्यभावाच्च॥ परिसमूहनपर्युक्षणे तु न भवतः॥ पांसुनिरसनलक्षण दृ
ष्टकार्यस्य लोपात्॥ नियमादृष्टमात्रस्य वा प्रयोजकता॥ इति न्यायमाहुः हेमाद्रिस्तु मत द्वयमपि वि
लेखन तु किंचिन्निर्णितायाः पाणौ हुतस्य द्वयकत्लक्षणं निषेधं तिरस्कारः॥ अन्नं पाणितले दत्तं पूर्व
मश्नत्यनुद्वयः॥ पितरस्तेन तृप्यंति शेषान्नं न लभंति ते यच्च पाणितले दत्तं यच्चान्यदुपकल्पितं॥ एकीभा
वेन भोक्तव्यं पृथग्भावो न विद्यत इति॥ स्मृत्यर्थसारे हुतानुसवधानादक्षिणशो जुहुयाद्विप्रपाणौ वेति

श्रा॰म॰ ५१ विकल्पमभिधायपाणिकृतंतदेवपात्रपात्रम्योपविशेत्॥अथवाभाजनेछित्वाचम्योपविशेत्॥विधुस
दिमिरग्निदग्धैर्नेकृतंपूर्वंस्त्रीनायाभोजनकालेएवत्वश्रीयात्॥त्यक्ताग्निकृतंतुनाश्रीयादित्युक्तं॥अथाप
रिवेषणंयथालाभंकार्यं॥तदुत्तरकृत्यमाहयाज्ञवल्क्यः॥दत्त्वान्नंपृथिवीपात्रमितिपात्राभिमंत्रणं॥कृ
त्वेदंविष्णुरित्यन्नेद्विजांगुष्ठंनिवेशयेत्॥मनुः॥विप्रोहव्यंचकव्यंचब्रूयाभक्ष्वेतिवैमात्॥याज्ञवल्क्यः॥
सव्याहृतीकांगायत्रींमधुवाताइतित्र्यचं॥जप्त्वायथासुखंवाच्यंभुंजीरंस्तेपिवाग्यताइति॥तथागाय
त्रींत्रिःसकृद्वापिजपेद्व्याहृतिपूर्वकं॥मधुवाताइतित्र्यचंमध्वित्येतत्त्रिकंतथेति॥स्मृत्यंतरे॥संकल्प
पितृदेवेभ्यःसावित्रीमधुमज्जपः॥श्राद्धंनिवेद्यापोशनंजपंप्रैषोथभोजनं॥ ॥अथभोजयितुर्नियमाः
॥ ॥याज्ञवल्क्यः॥अन्नमिष्टंहविष्यंचदद्यादक्रोधनत्वरः॥इष्टंब्राह्मणानां॥मनुः॥यद्यद्रोचेतविप्रे
भ्यस्तत्तद्दद्यादमत्सरः॥ब्रह्मोद्याश्चकथाःकुर्यात्पितृणामेतदीप्सितमिति॥निगमः॥अपेक्षितंयोन
दद्याच्छ्राद्धार्थमुपकल्पितं॥अधःकृत्वामुखोग्रसुतिर्यग्योनिपुगच्छति॥शंखः॥श्राद्धेनियुक्तान्नुंजान रम॰ ५१

नपृच्छेद्धव्यवर्णादिषु॥उछिष्टापितरोयांतिपृछतोनात्रसंशयः॥दातुःपतंतिवाक्कर्मेजिह्वानोकुर्वन्निषेधते।
देवलः॥नाश्रुसंपातयेच्छ्राद्धेनजल्पेन्नहसेन्नियः॥नविघ्नंश्रोन्नंसंकुध्येनोद्विजेन्नान्नकुत्सयेत्॥ब्राह्मोदि
कारणेश्राद्धेनैवक्रोधंसमुद्धरेत्॥आश्रितःखिन्नगात्रेवाननिष्टेयितसन्निधौ॥आश्रितस्तेननिस्तादि
ष्वनिर्दिष्टशरीरः॥विष्णुः॥नात्रमासनमारोपयेन्नपदास्पृशेन्नावक्षुतंकुर्यात्॥आसनग्रहणमाधारो
पलक्षणं॥ततश्राद्धमाधारोपरिनस्थापयेदित्यर्थः॥ ॥अथयजमानजप्यानि॥शंखलिखितौ॥ ॥दर्भेषासी
नोमधुवाताऋचोजपेत्॥अमुंचपारउपवीत्येवकुर्यात्॥कुशपाणिःकुशासीनउपवीतीजपेत्ततइतिब्र
ह्मांशात्॥मनुः॥स्वाध्यायंश्रावयेत्पित्र्येधर्मशास्त्राणिचैवहि॥आख्यानानीतिहासांश्चपुराणानिखि
लानिच॥आख्यानानिसौपर्णादीनि॥पौराणानिचरममनलसावित्र्युपाख्यानादीनि॥इतिहासोमहाभा
रतंखिलानिपरिशिष्टानि॥श्रीसूक्तादीनि॥आपस्तंबः॥ब्रह्मविष्णुरुद्राणांस्तोत्राणिविविधा
निचेति॥श्रावणानिदृष्टानिनिगमे॥रक्षोघ्नाःपावमानानीदरीरतामवरमघवन्नपतीःसमंत्रान्द्वारका

शुद्धरक्षन्तीनु ॥ राक्षोघ्नैः कृणुष्व पाजइति पंचदशर्चः रक्षोहणमिति पंचविंशतिः ॥ इंद्रासोमा तपतइति ॥ अ
ग्ने हंसि न्यत्रिणइति नव पावमान्यः सुवं तु मापितरइत्याद्याः षोडशर्चः ॥ तरत्समंदीति वर्गः ॥ पंचस्वादि
ष्ठावर्षणिरिति द्वात्रिंशदृचः ॥ त्वं सोमासीति द्वात्रिंशत् ॥ उदीरतामवइति चतुर्दशः ॥ अग्नवतीः पितुउस्तो
षमित्येकादशगाथा इति ॥ पुनंतु मापितरइति षोडश पावमानीर्जपेदिति स्मृतौ च ॥ षोडशानां मध्ये आद्या
नवान्विशेषतइत्यर्थः ॥ यजूंषि चैव रुद्रांश्च राजोघ्नीर्क्चएवच ॥ कूष्मांड्यातरुद्रयान् ॥ जपेदितिशेषः ॥ शं
खलिखितौ ॥ अप्रतिरथं मध्येग यज्ञामनुस्वाकेति अप्रतिरथमाशुः शिशानइति द्वादशर्चं ॥ सामविशेष
इतिनाष्या ॥ सौरपुराणे ॥ धर्मशास्त्रं पुराणानि नित्यायवर्गि रस्त्वया ॥ ऐंद्रं च पौरुषं सूक्तं ब्राह्मणं नृत्राव
येत्ततइति ॥ स्वरूपं कृतुमुतयस्त्वादीनि त्रीणि सूक्तानि पूर्वस्यैकं दशमिंद्राधिनइत्यादीनि त्रीणि सूक्तानि
त्रीणि मात्स्ये ॥ इंद्रासोमसूक्तानि पावमानीस्वद्यकितइति ॥ ईशास्यसूक्तानि रुद्रसूक्तानि स्वस्त्ययनानि ॥ स्वादिष्ट
येत्यादीनि चत्वारि सूक्तानि सौम्यानि ॥ नविष्पे ॥ पावमान्यश्च कूष्मांड्यस्तु रुद्रवत्सरसमा ॥ राक्षोघ्नानि

च सूक्तानि पितृसूक्तान्यथापि वेतिश्रावयेदितिशेषः ॥ याज्ञवल्क्यः ॥ आतमेस्तु पवित्राणि जप्त्वा पूर्वं जपे
तयेति पूर्वं जपः ॥ कात्यायनी गायत्री मधुवाताइतित्र्चं ॥ मधुमधिति त्रिः ॥ तयोअग्निमीलइतिनवर्चं
वा यावायादीति चा अश्विनायज्वरीरिषइति द्वादशर्चं ॥ गायंति त्वेति च ॥ इंद्रं विश्वाइत्यष्टोकृचः ॥ अ
स्य वामस्येति पंचदशर्चं ॥ सांख्यायनी यास्का ॥ अग्निमीलइत्यादीन्येकादशसूक्तानि ॥ न वाउदेवा
इतिनवर्चं परंति ॥ आचाराद्रितिदेमाद्रि ॥ ॥ अथ चतुर्वेदजप्यानि ॥ ॥ हारीतः ॥ अत्रपितरइति यजु
र्नमोवः पितरइति यजुस्तामांमधुवाताइतितिस्रः ॥ पुनंतु मापितरइत्यनुवाकः ॥ त्वं सोमप्रचिकितइ
तिचैषा पित्र्यासदिता ॥ एतान्जपन् पितॄन्प्रीणातीति स्मातं वसिष्ठोन्दयास्मे त्येतदंतं यजुः ॥ बौधा
यनः ॥ राक्षोघ्नानि च सामानि स्वधावंति यजूंषि च ॥ राक्षोघ्नानि देवव्रतारण्यानि ॥ स्वधावंति पितृभ्यः स्व
धायिभ्यः इत्यादीनि ॥ मात्स्ये ॥ तथैवश्रावयेतिकाध्याय मधुब्राह्मणमेवच ॥ मंडलं ब्राह्मणं तद्वत्प्रीतिकारि
च यत्पुनः ॥ विज्ञाणमात्मनश्चापि तत्सर्वं समुदीरयेत् ॥ भारताध्ययनं कार्यं पितॄणां परमं प्रियं ॥ शं॰

श्रा·म· निकाध्यायः॥ शन्नोवातइति॥ इयंपृथिवीत्यादिमधुब्राह्मणं॥ यदंतन्मंडलंतवतीत्यादिमंडलब्राह्मणे॥ प्राति
५८ कारिइतिहासाख्यानादि॥ वीणावेणुध्वन्यादिवंतानयाचब्राह्मे॥ वीणावंशाध्वनिवायविशेष्यःसन्निवेशये
दिति॥ अस्मान्यथाचापराज्ञयानीतिहेमाद्रौ॥ तत्रतैत्तिरीयाण्यंतावज्जप्यानि॥ दिवोवेत्यादिविप्लवइत्यं
तानियजूंषिअग्नउदवइत्यादि॥ वन्यःपंचमइत्येतानिच॥ रक्षोहणोवलगहमइत्यनुवाकः॥ इंद्रोवृत्रंहद
वित्यनुवाकः॥ वैश्वदेवेन वैप्रजापतिरित्याद्यनुवाकद्वयं॥ अयंवाव यःपवतइत्यनुवाकत्रयं॥ कवांश्वा
वीत्यानुवाकः॥ अमृतोपस्मरणमसीत्याद्यनुवाकपंचमं॥ ब्रह्मसमानुमेमित्यनुवाकत्रयं॥ अणोरणीय
नित्यनुवाकः॥ मेधांमइंद्रोददात्वित्यादयस्त्रयोनुवाकाः॥ नकंचनेत्याद्युपनिषदित्येतेखंडं॥ ॥ अथवाज
सनेयिनांजप्यानि॥ ॥ कात्यायनः॥ अप्स्वत्सुजपेद्याहृतिपूर्वांगायत्रींसप्रणवांसहस्रावरांल्लोमंपुरुष
सूक्तंअप्रतिरथंपितृमंत्रान्सामानिचपवित्राणि॥ ॥ अथयमेवायण्णायानां॥ ॥ इषेत्वासुन्वतापत्वावा
यवेंस्कंदेवोवःसवितेत्याद्यःपंचानुवाकाः॥ ॥ अथयकृतानां॥ ॥ सोमायपितृमतेत्याज्यंपितृमोवार्द्दष राम·
५९

श्याइत्यनुवाकः॥ उद्वंतस्वारवामहइत्याद्यनुवाकः॥ वद्राक्रियापितृयज्ञइत्याद्यनुवाकः॥ ॥ अथच्छंदोगज
पानि॥ ॥ गोभिलः॥ अप्सुजपेद्याहृतिपूर्वांसावित्रींसांचैवगायत्रींपित्र्यांचसंहितांमधुच्छंदसंचसर्गे
लोकेमहीयतइदंचास्याक्षयंभवति॥ वरतंतुः॥ प्राणायामपूर्वकंपंचसप्तांतंगायत्रींसप्रणवांसव्याहृ
तिपंचेदि -ति॥ उंसितुवःश्रुत्वेतपंसप्तशतिपंचसप्तांतंकृत्वानुनुवंस्वारितिसप्रणवव्याहृतिकांगाय
त्रींजपेदित्यर्थः॥ मात्स्ये॥ रुद्रसूक्तंरंतहरसेष्टसाममयोरवं॥ गायत्रंबृहत्पंतरादीनिच्छंदोगानांप्रसि
द्धानिप्रचेताः॥ आदित्यब्राह्मणंश्चैवविष्णोरुद्रस्यचैवहि॥ सामानिश्रावयेद्देतयान्यान्यपिधूरिङ्गः॥ आ
दित्यसामान्यादित्यव्रताख्यानेकविंशतिः॥ ब्रह्मसामब्रह्मजज्ञानंप्रथमंसामान्यपिधूरिङ्गः॥ ज्यामितिप्र
स्तावंविष्णुरुद्रयोःसामानि॥ छंदोगानांपुष्पयंयेप्रसिद्धेकौपमज्ञगतायैपंहुत्वपवित्रपतिरित्यादिनि
पंचदशसामानिअसौवाआदित्यइत्याद्यायज्ञवृश्नावर्णीयःराणायनीयैर्महानाम्नीसामसन्निष्टचारानु
वर्णायमितिहेमाद्रिः॥ ॥ अथर्ववेदिनांतु॥ ॥ आइंद्रस्यबाहूइत्यप्रतिरथंसूक्तंप्राणायनामइत्यादीनि

त्रीणिसूक्तानिसहस्रबाहुःपुरुषइतिपुरुषसूक्तं॥ कालोअश्वोवहतुसप्तरश्मिरितिकालसूक्तं॥ उपनि
षद्रमध्यात्मं॥ प्राणाग्निहोत्रमहोपनिषदं॥ एतत्सर्वंसिंनवेनुमात्स्मे॥ अज्ञानावेसर्वविद्यानांगायत्री
जपमारभेदिति॥ ॥अथपौराणजप्यानि॥ ॥विष्णुधर्मोत्तरे॥ देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच॥
नमःस्वाहायैस्वधायैनित्यमेवनमोनमः॥ आद्यावसानेश्राद्धस्यत्रिरावृत्तंजपेत्सदा॥ तथा॥ पिंडनि
र्वपणेवापिजपेदेनंसमाहितः॥ पितरस्तत्क्षिप्रमायातिराक्षसाःप्रद्रवंतिच॥ गारुडे॥ योविष्णुहृदयंम
त्रंश्राद्धेषुनियतःपठेत्॥ पितरस्तर्पितास्तेनपयसाचघृतेनचा चतुर्भिश्चचतुर्भिश्चचतुर्भिश्चद्वाभ्यांपं
चभिरेव॥ हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदतु॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु॥ न्यूनं
संपूर्णतांयातिसद्योवंदेतमच्युत॥ आदिमध्यावसानेषुश्राद्धस्यनियतःशुचिः॥ जपन्विष्णुहृदयंमंत्रं
विष्णुलोकेसमश्नुते॥ चतुर्भिरितित्रिगतपये॥ आश्रावयेदिति॥ अस्तुश्रौषट्चतुरक्षरं॥ यजेतिद्व्यक्षर
येयजामहेइतिपंचाक्षरं॥ द्व्यक्षरोवषट्कारः॥ एषससप्तदशःप्रजापतिरधिदैवतमिति॥ विष्णुधर्मोत्तरे

॥अमूर्तानांचमूर्तानांपितॄणांदीप्ततेजसां॥ नमस्यामिसदातेषांध्यानिनांयोगचक्षुषां॥ इत्यादिसमाप्ति
स्तोत्र॥ जप्योपयुक्तः॥ अथभोक्तृनियमाः॥ ॥प्रचेताः॥ पीत्वापोशनमश्नीयात्पात्रेदत्तमगर्हितं॥ सर्वेंद्रिया
णांचापल्यंनकुर्यात्पाणिपादयोः॥ मनुः॥ अत्युष्णंसर्वमन्नंस्याद्भुंजीरंस्तेचवाग्यताः॥ नचद्विजानपोह
र्युर्दात्रापृष्टाहविर्गुणान्॥ ऋग्नेत्यविवक्षितं॥ अत्रिः॥ ॐकारेणापियोऽभ्रूपादहस्ताद्वापितृगुणान्हेत्॥ म
त्वाञ्चोद्वारेत्यानुंमुंचेहस्तेनवापिबेत्॥ प्रौढपादोबहिःकक्षोद्विजस्तुकरेणयत्॥ अंगुष्ठेनाप्यतिसुख
श्रेष्ठेनवापुनः॥ पीत्वावशिष्टतोयानिपुनरुद्धृत्यवापिबेत्॥ खदिताह्वपुनःस्वादेन्मोदकानिफलानिवा
मुखेनवाधमेदत्तन्निष्ठिवेभोजनेपिवा॥ इच्छमश्नन्द्विजःश्राद्धंदत्वागच्छत्यधोगतिं॥ बौधायनः॥ पा
देनपादमाक्रम्ययोभुंक्तेनापदिद्विजः॥ नैवासौभोजितोज्ञेयोदैवेपित्र्येगतः॥ शंखलिखितौ॥ ब्रा
ह्मणाअन्नगुणान्दोषान्नाभिवदेयुर्वृत्तंब्रूयुः॥ अश्नीमंनःस्वन्नंसेवुः॥ अन्नपानंनप्रमत्तमितिब्रूयुरन्नहस्त
संज्ञया॥ नाधिकंदद्यान्नप्रतिगृह्णीयात्॥ बृहद्गतातपः॥ आपत्तितंयाचितंपां॥ सर्वमुपकल्पितं

नथाचतेद्विजोमन्दरासनवेत्पित्रघातकयत्नुकृष्टृहाददरगात्रेणमश्नुतेकर्मणस्ततः॥तस्माद्विद्वान्नैवद
द्यान्नचरणपर्येदिति॥मनुवचनंतत्तदनुपकल्पितवस्तुविषये॥मनुः॥यद्वेष्टितशिराभुंक्तेयद्भुंक्तेदक्षिण
मुखः॥सोपानत्कश्चयद्भुंक्तेतद्वैरक्षांसिभुंजते॥अतएवनिषेधादनवकाशेदक्षिणेतरदिङ्मुखभोजन
मनुमतमितिज्ञायतेवह्वृचपरिशिष्टे॥यच्चपाणितलेदत्तंयच्चान्नमुपकल्पितं॥एकीभावेननोक्तव्यंपृ
थग्भावोनविद्यते॥पाणितलेदत्तमग्नौकरणान्नं॥निगमः॥मांसापूपफलेक्ष्वादिदंतच्छेदनमाचरेत्॥
ग्रासशेषंनपात्रेस्यात्पीतशेषंतथापिबेत्॥वामादन्यतरस्मात्तुकर्त्तव्यमाद्यंगरवः॥श्राद्धपंक्तौतु
भुंजानोब्राह्मणोस्पृशेत्॥तदन्नमत्यजन्भुक्त्वागायत्र्यष्टशतंजपेत्॥उशनाः॥भोजनंतुननिःशेषंकु
र्यात्प्राज्ञःकथंचन॥अन्यत्रदध्नःक्षीराद्वाक्षौद्रात्सक्तुभ्यएवचेति॥आश्वलायनः॥स्विष्टदवकृतंरधुक
द्विकरमित्यर्थः॥उच्छिष्टस्यदासानांभागतामाहमनुः॥उच्छेषणंभूमिगतमजिह्मस्याशठस्यदासवर्ग
स्यतत्पित्र्येभागधेयंप्रचक्षतेइतिततःसर्वब्राह्मणमिन्नंगृहीत्वातन्मात्रेतिविप्रान्पृष्ट्वातृप्ताःस्थइतितैस्तृ

कैःशेषमप्यन्नमस्तिकिंक्रियतामितिपृष्ट्वाइष्टैःसहोपभुज्यतामित्यनुज्ञातःपित्र्स्थानविप्रोच्छिष्टसन्निधौदक्षि
णाग्रेषुदर्भेषुतिलोदकंप्रक्षिप्यविप्रहस्तेषुगंडूषार्थंसकृदुदकंदद्यात्हेमाद्रौधर्मः॥केषांचिद्विकिरःपूर्वं॥
तस्मिंश्चपूर्वमथान्येषांविकिरस्तदनंतरं॥अमृतापिधानात्पूर्वंकेषांचिद्विकिरःस्मृतः॥अन्येषांतुततःप
श्चाद्विप्राणामितिसंमतं॥गायत्र्यादिजपात्पूर्वंकेषांचित्तदनंतरं॥कात्यायनः॥तस्मात्सालान्नेवकार्यसकृ
दुपोदत्वापूर्वंविज्ञायत्रीजस्त्वामधुमतीर्मधुमद्धिन्नस्तेवत्नृतमित्युक्तंवेतइति॥विष्णुराजायनी॥सं
पन्नंपृष्ट्वान्नंविकिरकार्येति॥विष्णुधर्मोत्तरे॥तनयोःप्रश्नोत्तरयोःस्मृत्युयोज्जानुपातनंचदर्शितं॥पृष्ट
वाब्राह्मणमन्नान्निविष्टेनजानुनातृप्तामभवतःसंपन्नंनवतांकश्चिदवतु॥तृप्ताःस्मेतिचतैरुक्तेसंपन्नं
मिति॥चाप्यथदद्यादाचमनंतत्राश्वाप्यधानसमाहितःश्राद्धविशेषेप्रश्नोत्तरमाहविष्णुः॥पित्र्येस्वदित
मित्येवंवाच्यंगोष्ठेषुसुश्रुतंसंपन्नमित्यभ्युदयेदैवेरोचतइत्यपि॥हारीतः॥तृप्ताःस्वदितमितिपृष्ट्वेत्युदि
तमितिप्रत्युक्तस्मृतमितिदैवेधान्यपुष्पमितिसर्वेरस्वास्वांतेषुन्यस्यैविविरंनिनयेत्॥॥अथाचमनदा

नं॥ ॥विष्णुः॥ ॥उदङ्मुखेष्वाचमनमादौ देयात्ततः प्राङ्मुखेषु इति॥ उदङ्मुखेषु पित्र्यादिविप्रेषु॥ प्राङ्मुखे दे
वविप्रेषु हस्तमप्रक्षाल्यैव गंडूषग्रहणं कर्त्तव्यं॥ अन्यथा दोषमाह मरीचिः॥ हस्तमप्रक्षाल्य गंडूषं यः पिबे
द्विचक्षणः॥ आसुरं तद्भवेच्छ्राद्धं पितॄणं नोपतिष्ठते॥ गोभिलः॥ भुक्त्वाचम्य परस्तो मान् जपेत्तत्समा
हितः॥ गोमस्कंचामस्तकंचभ्यध्येतस्य समीनरं॥ भुक्त्वा सन्नस्तु चौरेदेशो वामदेव्यं ततो जपेत्॥ एवं साम
निराछन्नो भुंजानस्तु द्विजोत्तमः॥ आइद्भोजनदोषैस्तु मदाद्भिर्नोपलिप्यते॥ अन्यथैव दद्विभुंजानो द्यक
क्षेयमंत्रवित्॥ आत्मानमनृदाता रंगमयत्यासुरं छितिमिति॥ ॥अथ विकिरेतिकर्त्तव्यता प्रायमात्स
योः॥ तमानुत्साल्वा ततः कुर्याद्विकिरं सार्ववर्णिकं सोदकं चान्नमुध्धृत्य सतिलं प्रक्षिपेद्भुवि॥ ब्रह्मपु
राणे॥ उच्छिष्टे सतिलान् दर्भान् दक्षिणाग्राग्विपातयेत्॥ उच्छिष्टे उच्छिष्टसंनिधौ विष्णुः॥ भुक्तवत्सु
ब्राह्मणेषु तृप्तिमागतेषु मामेहृष्टाइत्यन्नं सतृणमसुद्धान्नविकिरणमुच्छिष्टाग्रतः कुर्यादिति॥ मंत्रं
लक्ष्मामेहृष्टं वक्रतेपूर्त्तमस्तु ब्राह्मणो मे जुषताम चान्नं सहस्रधारममृतोदकं मेपुरतस्त्वेतनसरमेवो

मन्निति॥ वैश्वदेवविकिरमंत्रमाह गोभिलः॥ असोमपाश्च ये देवा यज्ञभागविवर्जिताः॥ तेषामन्नं प्रदा
स्यामि विकिरं वैश्वदेविकमिति॥ पित्र्यविकिरमंत्रमाह कात्यायनः॥ ये अग्निदग्धा ये अनग्निदग्धा
जीवा जाता कुले मम मान्नमौदत्तेन तृप्यंतु तृप्ता यांतु परां गतिं॥ ब्रह्मपुराणे गोभिलः॥ ये अग्निदग्धा
जीवा ये प्यनग्निदग्धाः कुले मम॥ भूम्यां दत्तस्मौरेदत्तेनेतिशेषः॥ यामेमाक्षये॥ अग्निदग्धाश्च ये
जीवा ये प्यदग्धाः कुले मम॥ भूमौ दत्तेन तृप्यंतु तृप्ता यांतु परां गतिं॥ येषां न माता न पिता न बंधु
श्चान्नसिद्धिर्न तथान्नमस्ति॥ तत्तृप्तयेन्नं भुवि दत्तमेतत्प्रयांतु लोकेषु सुखाय तेषु॥ येस्मत्कुले तु पि
तरो लुप्तपिंडोदकक्रियाः॥ ये चाप्यकृतपिंडास्तु ये च गर्भाद्विनिस्सृताः॥ येषां दाहो न क्रियते ये ग्नि द
ग्धाश्च ये परे॥ भूमौ दत्तेन तृप्यंतु तृप्ता यांतु परां गतिं॥ अपरार्के तु॥ असंस्कृताः प्रमीता ये त्यागि
नो याः कुलस्त्रियः॥ दास्यामि तेभ्यो विकिरं पित्र्यं भूमौ जलेन त्विति॥ मंत्रोप्युक्तः॥ ॥विकिरस्य प्रति
पत्तिमाह गौतमः॥ ॥विकिरमुच्छिष्टे प्रतिपादयेत्॥ उच्छिष्टे रितिम दर्येत्तती या॥ मार्गवः॥ पिंड

श्रा॰म॰ वत्स्यति पङ्क्तिःस्याद्विकिरस्येति तौ त्वलि॥इदं च उच्छिष्टसन्निधौ विकिरदाने तैःसदप्रतिपादनं॥पिंडसन्नि
६३ धौ चेत्पिंडवदिति व्यवस्थितमिति केचित॥पिंडसंनिधौ विकिरदानमाह धूम्रः॥कपिंछास्यद्भ्रमाणेन
पिंडं दद्यात्समाहितः तत्समं विकिरं दद्यात्पिंडं तेनुषड्गुलेति॥ ॥अथ पिंडदानं॥ ॥सांख्यायनगृह्ये
॥भुक्तवत्सु पिंडान्दद्यात्पुरस्तादिति पक्षे ब्राह्मणार्चनानंतरमाह देवलः॥अथ संगृह्य कल्पसद
नं पूर्णमिन्नसां॥पुरस्तादुपवेश्यैषां पिंडं वा पनिवेदितादिना॥अग्नौकरणानंतरमाह मनुः॥अ
पसव्यमग्नौ कृत्वा सर्वमावृत्परिक्रमं॥अपसव्येन हस्तेन निर्वपेदुदकं भुवि॥त्रिस्कृत्स्माद्धविःशेषा
त्पिंडान्कृत्वा समाहितः॥इत्यादि॥आश्वलायनगृह्ये॥भुक्तवत्स्वनाचांतेषु पिंडान्निदध्यादाचां
तेष्वित्येक इति॥कात्यायनोपि॥हुतशेषं प्रेषु सम्पन्नमाचांतेषु ब्राह्मणेषु पिंडदानमुक्तं॥अनाचां
तेष्वित्येक इति॥केचित्तु भुक्तवत्स्वनाचांतेष्वेव विकिरं दत्वा स्वधावाचयित्वा पिंडदानं कुर्वंति॥तथा राम॰
च शंखलिखितौ॥गायत्रीं समनुश्राव्य तस्मान्नुज्ञातास्वदितमिति शेषमन्नमनुज्ञाप्य कृताद ६३

न्नाद्विकिरं कुर्यात्स्वधां वाचयित्वा विष्टरं स्थाप्य निदध्यादित्यादि॥विष्टरः पिंडाधस्तनादर्भाः॥बृहस्पति
ना त्वाचांतेषु पिंडदानमनाचांतेषु विकिर इत्युक्तं॥आचांतेष्वपि कुर्वीणाः केचिदपि रमणानुज्ञावच
नस्वधावाचनादिपदार्थमकृत्वैव पिंडदानं कुर्वंति॥एतत्तु नरकजातोत्वाद्यमः॥आचांतान्ब्रा
ह्मणानीयाद्भिर्वाद्य कृतांजलिः॥भवंतोरमतामन्नमनुज्ञातानुज्ञातलक्षणं॥स्वधेति चेति वक्तव्यं श्रा
यंतां पितरस्तथा॥अक्षय्यमन्नदानं तु वाच्यं प्रात्थ्यै द्विजातिभिः॥ततो निर्वपणं कृत्वा पिंडानां तदनं
तरमिति॥हारीतस्तु॥वाजेवाज इत्यनुव्रजेत्यंते भोजनोत्तरं तत्रच्छत्रादविशेषस्य पिंडान्पिंडपि
तृयज्ञवन्निदध्यादिति आह॥एते च पिंडदानकालाः स्वस्वगृह्यानुसारेण व्यवस्थिता ज्ञेयाः॥भोजनात्पू
र्वकालो नरकालत्वयोर्व्यवस्थामाह लौगाक्षिः॥अग्न्यग्नस्तेषु पागेषु पूर्वं पिंडावनेजनं॥भोजनास्य
ग्न्यग्नस्तेषु पश्चादेवोपकल्पयेत्॥अग्न्यग्नस्तेषु सपिंडीकरणपूर्ववत्तिषु प्रेतश्राद्धेषु॥अवनेजनं
अवाचीनपाणिना निर्वपणमिति स्मृतिचंद्रिकाकारः॥अवनेजनं दानमिति हेमाद्रिः॥अग्न्यग्नस्तं सपिं

श्रा॰म॰
६४

णीकरणं दिश्याद्यं॥ इयं विवृस्था केषांचिदेव॥ मन्वादिस्मृतिषु मत्स्यादिपुराणेषु च॥ पूर्वं काले भोजन
नैवोक्त॥ स्वगृह्ये विशेषानुक्तौ त्वाचान्तेष्वेकदेशे इति पक्षो ग्रहीतुं न्याय्यः॥ ॥अथ पिंडदानदेशः॥ ॥देव
लः॥ कृत्वैवमग्निपिंडानां संनिधौ तदनंतरं॥ पक्कान्नेन बलिं तेभ्यः पिंडेभ्यो दापयेद्द्विजः॥ अत्राग्नौ हो
मस्य पिंडसन्निधानं वदता पार्वणपिंडदानमप्यग्निसंनिधानमुक्तं भवतीति हेमाद्रिः॥ अस्माभिस्तु या
ज्ञवल्क्यादिवचनेष्वुच्छिष्टसन्निधौ पिंडान्दद्यादिति॥ अत्र विशेषमाह व्यासः॥ अरत्निमात्रमुत्सृज्य
पिंडांस्तत्र प्रदापयेत्॥ यत्रोपस्पृष्टतां वा पिबन्तु वंति न विंदवः॥ पारस्करः॥ विप्राणां वा क्रमात्रेण पिं
डदानं विधीयते॥ पात्राणामिति वा पाठः॥ अत्रिः॥ पितॄणां मासनस्थानाद्रत्नतस्त्रिषु रत्निषु॥ उ
च्छिष्टसन्निधानं तु नोच्छिष्टासनसन्निधौ॥ जातूकर्ण्यः॥ व्याममात्रं समुत्सृज्य तत्र पिंडान्प्रदापये
त्॥ ब्राह्मणभोजनात्पूर्वकाले प्रदेयास्तं उद्दानपक्षे तु देशो विषमाह देवलः॥ अश्मन्यमधुसर्पि
र्मांसान्नयेत्कुशान्संचये॥ छायायां दक्षिणस्यैव दर्भे देवसन्निधौ॥ श्राद्धसन्निधौ दक्षिणस्यैतेत छा राम॰ ६४

यायां द्विजाद्वस्ताद्यतनान्दहेच्चेत्यर्थः॥ देवलः॥ अथ संग्रह्य कलशं सदर्भं पूर्णमंभसा॥ पुरस्ता
दुपविष्टेभ्यः पिंडवापं निवेदयेत्॥ ततस्तैरभ्यनुज्ञातो दक्षिणां दिशमेत्य सः॥ कलशं संग्रहस्तत्र पा
नीयकुंभेन तर्पयित्वा यतः॥ पितृनित्यादिना कलशेनैव येषां कृत्यं विहितं तेषामेव॥ अन्येषां त्वव ने
जनादिकं श्राद्धीयेनैवोदकेन॥ अत एतत्संग्रहमंतरेण ग्रगलंकायनादिपिंडनापमनजाप्ययतवा
क्कायमानसः॥ सतिलेन ततोन्नेन पिंडान्निर्वपेत्॥ ॥अथ पिंडदानस्थानकल्पना॥ ॥देवलः॥ उप
लिप्ते शुचौ देशे स्थानं कुर्वीत सैकतं॥ मंडलं चतुरस्रं वा दक्षिणाप्रवणं तं महत्॥ एतच्च सैकतस्थानक
रणं केषांचिदेव॥ अत एवोपलिप्ते महीपृष्ठे इति मत्स्यपुराणे मही पृष्ठे एव पिंडधारणत्वेन वि
हितं॥ देवलः॥ एककर्षेण तन्मध्यमुल्लिखेत्त्रिषु तं त्यजेत्॥ तन्मध्यं मंडलमध्यं॥ त्रिरिति मात्रमा
तामहादीनां पिंडदानपक्षे॥ अन्यथा सकृदेव॥ स्कंदनं वेपणं चैव तथैवोल्लेखनक्रिया॥ सकृदेवा
पितृणां स्याद्देवानां तदनंतरमिति ब्रह्मांडपुराणात्॥ एतच्च स्फोनतरभावेऽकुशैर्वा कार्यं वज्रेण वा

श्रा.म.
६५

कुशैर्वापि उल्लिखेत महद्धि इति ब्रह्मांडपुराणात्॥ वन्यस्करः॥ वज्रो वैकङ्कत इति कर्कः॥ तेनैव सकोत्तरा
म्नां पाणिनां कुर्यादुल्लेखनं द्विजः॥ सव्यः वामः उत्तरस्य यो स्तौ सव्योत्तरौ॥ एतच्च साग्नेपि दिग्निमु
खं॥ आश्वलायनेन दक्षिणप्राचीप्रकृत्य सर्वकर्मणि तां दिशमित्युक्तत्वात्॥ दक्षिणा दिक् पितृ
णामिति श्रुते दक्षिणा दिगपि विकल्प्येन॥ कर्त्तापि सो कर्याभिमुखो दक्षिणाभिमुखो वाल्लेखाक
रणे मंत्र उक्तो ब्रह्मपुराणे॥ निहन्मि सर्वं यदमेध्यमवदताश्च सर्वे सुरदानवा मया रक्षांसि यक्षा
श्च पिशाचाश्च संघा हता मया यातुधानाश्च सर्वे॥ एतेन मंत्रेण संयतात्मा दर्भेण वेदिं विलिखेत्रि
रिति पिंडपितृयज्ञे कात्यायनः॥ दक्षिणेनोल्लिखन्यपहता इत्यपरेण वा॥ अभ्यपेक्षया दक्षिण
तमवरत्वं च॥ उल्लिख्य चाभ्युक्षणं॥ तामभ्युक्षेत्याश्वलायनवचनात्॥ उल्लिख्योल्मुकनिधानमा
ह कात्यायनः॥ उल्मुकं परस्तात्करोति ये रूपाणीति॥ आश्वलायनः॥ सकृदाच्छिन्नैरवस्तीर्यति॥
अथ सकृदाच्छिन्नान्यपम्लंदानंग निनवं तीतिक्षत पये॥ ततः मर्लंतनपितृणामितितु ते तत्र

रा.म.
६५

ये॥ यमः॥ विष्टरांस्त्रीन्न्वयेत्तत्तन्नामगोत्रसमन्वितान्॥ अङ्गिरस्तु स्वविधिवत्तिसैरन्यवकीर्य चाअ
मुकगोत्रस्यास्मत्पितुरमुकशर्मणे पवित्रास्तरणं पूर्वमित्यर्घः॥ दर्भास्तरणानंतरमावाहये
वलः॥ अथ सांजलिरुच्छाय स्थित्वावाहयेत्पितृन्॥ पितरो मे प्रसीदंतु प्रयांतु च पितामहाः॥ इति
संकीर्तयेत्स्मृत्वेति पृच्छणमनुच्छुसन्॥ आवाहयित्वा दर्भैस्तैस्तेषां स्थानिकल्पयेत्॥ ते चासीने
षु पात्रेण प्रकृष्टेणं मार्जनोदकं॥ प्रक्षाल्य विकिरेत्तत्तन्नामापूर्वकिलानपीति॥ दर्भास्तरणानंतर
मावहमंत्रं॥ असाववनेनिक्ष्वेति पुरुषं पुरुषं प्रति त्रिस्त्रिरेकैन विद्धाताववनेजनं॥ असाविति
गोत्रनाम्नामपिग्रहणं॥ पिंडोदकप्रदानं तु नियनैमित्तिकेष्वपि॥ आजप्पनामगोत्रेण कर्त्तव्यं स
र्वदैव हि इति वासिष्ठः॥ कात्यायनेन तु बर्हिस्तरणात्पूर्वं नेजनमुक्तमनयोर्विकल्पो यथागृह्यं
वा स्यात्॥ इदं चोदकं सतिलमित्याह सनातिजोक्तिप्रयोगे उदकेनासिंचेति मार्कंडेयपुराणे॥ पितृ
णां येन तोयं च दद्यात्तेभ्यः समाहित इति॥ कात्यायनत्र्यंगबायनगोभिलादिभिस्तु अवनेजनार्थमुद

कपात्रमुक्तां षड्भिरन्नमते॥ सव्यं जानु निपात्यैवं त्रमो पिंडान्दयत्ततः॥ निर्वपेमितृतीर्थेन स्वधाकारमु
दाहरन्॥ मरीचिः॥ पात्राणं खड्गपात्रेण पिंडदाने विधीयते॥ राजतौदुंबराभ्यां वा हस्तेनैवाथवा पुनरि
ति॥ खड्गस्वरूपमापदवि शेषज्ञानलादाक्षिसनवं पात्रं खड्गपात्रं औदुंबरं ताम्रमयं॥ सव्यपाणिस
योजनं उक्तं खलिखितास्या मुक्तं पिंडान्निदध्यात्सव्येन पाणिना दक्षिणं पाणिमुपसंयोज्येति देवलः॥ अ
पसव्यमपांगुष्टमिति॥ ब्रह्मांडपुराणे॥ उत्तानेन तु हस्तेन निर्वपेद्दक्षिणामुख इति॥ पितृतीर्थचिन
मनं वा हम्पस्तं वा॥ सव्यं जान्वाम्यावाचीनपाणिरिति॥ उत्तान एवाधरीकृतपितृतीर्थः॥ पाणिरवा
चीनः॥ अवाचीनं मवपराचीनत्वपक्षेनाश्वलायनः॥ तस्मां पिंडान्निदध्यात्प्राचीनपाणिरि
ति॥ अग्नौकरणात्पूर्वं पिंडदानपक्षे तदर्थेवृणपिंडान्नतत्स्वल्पमुपादाय सपवित्रेण पाणिने
त्यादिना देवलेनोक्तः॥ अग्नौकरणोत्तरमितिपक्षे तु तच्छेषादिरित्याह मनुः॥ त्रीस्तस्माद्धविः॥

शेषात्पिंडान्कृत्वा समाहितः॥ ओदनेनैव विधिना निर्वपेद्दक्षिणामुख इति॥ भोजनोत्तरकाली ने
तु कात्यायनः॥ सर्वमन्नमेकत उद्धृत्येति॥ सर्वशब्दः प्रकृतान्नजातिसर्वत्वार्थः॥ इदं चाग्नौकरणशेषेण
मिश्रणीयमित्याहाश्वलायनः॥ यद्यदन्नमुपयुक्तं ततस्थालीपाकेन सह पिंडार्थमुद्धृत्य पिंडान्निद
ध्यादिति॥ यत्तु पठंति॥ माषाः सर्वत्र वै ग्राह्यानग्राह्यास्त्वग्निपिंडयोः॥ ब्राह्मणे तु यथाकामं द्यंतयामा
षोग्निपिंडयोः रिति॥ तन्निर्मूलं॥ तेन माषा अपि ग्राह्या एवेति वायुपुराणे॥ मधुसर्पिस्तिलयुतान्त्रि
पिंडान्निर्वपेद्बुधः॥ नात्र मध्वादित्रयनियमः क्रियते किंतु तिलाय एव॥ अत एव तिलमधुद्वययु
ता बृहस्पतिनोक्ताः सर्वस्मात्त्वकृतादन्नात्पिंडान्मधुतिलान्वितानिति॥ तिलमात्रयुक्ता तासु सर्वम
न्नमुपादाय सतिलं दक्षिणामुख इति याज्ञवल्क्येनोक्ता॥ तेन नत्रयं नियतमिति केचित्॥ वस्तुत
यनियमे पिकलौ मधु न देयं॥ अक्षताग्गोपशुश्चैव श्राद्धे मांसं तथा मधुः॥ देवराच्च सुतोत्पत्तिः कलौ
पंचविवर्जयेदिति श्राद्धदीपकलिकायां॥ निगमोक्तेः॥ ॥अथ निगमोक्ते पिंडपरिमाणं॥ ॥व्या
सः॥ द्विहायनस्य हस्तस्य विशुस्तास्ये यथा सुखं॥ तथा कुर्यात्प्रमाणं तु पिंडानां व्यासभाषितं॥

श्रा॰म॰ ६७ हिरण्यनःहिवर्षब्रह्मांडपुराणे॥त्रान्विंशंनानुपूर्वेणसांगुष्ठमुष्टिवर्द्धनात्॥मुष्टौनिवेशितेपिंडे
यासांगुष्ठमुष्टिर्न्निवर्तीत्यर्थः॥अंगिरा॥कपित्थबिल्वमात्रान्वापिंडान्दद्यात्समाहितः॥कुक्कुटां
डप्रमाणान्वायदिवामलकैःसमान्॥बदरेणसमान्वापिदद्यात्श्राद्धसमन्वितइति॥एषांचव्यवस्थि
तेदेनव्यवस्था॥व्यवस्थापुस्तानिपरिणामान्याहमरीचिः॥आर्द्रामलकमात्रांस्तुकुर्यात्पिंडा
न्पार्वणे॥एकोद्दिष्टेबिल्वमात्रंपिंडमेकंतुकारयेत्॥नवश्राद्धेस्थूलतरंतस्मात्पितृनिर्वपेत्
तस्मात्पिंडस्थूलतरमाद्येचैवप्रतिवासरं॥अत्रामलकमात्रानेवपार्वणेइतिननियमः॥किंतु
आमलकमात्रामार्द्रणएवेति॥अतश्चाधिकपरिमाणपिंडाचारोनविरुध्यते॥नवश्राद्धंचस्व
ल्पांतरे॥प्रथमेह्नितृतीयेह्निपंचमेसप्तमेतथा॥नवमेकादशेचैवतन्नवश्राद्धमुच्यतइति॥मैत्रा
यणीयेत्रयाणांयथोत्तरंपरिमाणाधिक्यमुक्तं॥पितामहस्यनाम्नास्त्ववीयांसमधस्मं॥प्रति राम॰ ६७
पितामहस्यनाम्नास्तविष्टद्राघिष्ठमिति॥आवाहनादिपिंडदानांतंकर्मोक्ताद्यपाज्ञवल्क्यः॥मात

महानामप्येवंदद्यादाचमनंततः॥एवमित्युक्तवक्ष्यमाणंवदाचामितिदेवराः॥पितृमातामहपार्वण
योः॥अनंतरंकृत्यमाहसएव॥स्वस्तिवाच्यंततःकुर्यादक्षय्योदकमेवच॥ततःस्वस्तीतिब्रूतेति
ब्राह्मणाःस्वस्तिपूर्वकदानंकुर्यात्॥अस्त्वक्षय्यमितितेब्रूयुरित्यर्थः॥॥अथदक्षिणादानं॥॥त
द्विविधं॥विप्रोद्देशपकं॥पितृद्देशपकंच॥आद्यमाहदेवलः॥आचांतेभ्योद्विजेभ्यस्तुप्रदद्याद्दक्ष
क्षिणामिति॥द्वितीयमाहपारस्करः॥हिरण्यंविश्वेदेवेभ्योरजतंपितृभ्यइतितत्राद्यंसव्येन॥तथाच
जमदग्निः॥अपसव्यंकर्मसर्वंदक्षिणादानंक्रममाहदेवलः॥दक्षिणांपितृविप्रेभ्योदद्यात्पूर्वंततो
द्वयोः॥द्वयोर्द्वाभ्यांवैश्वदेविकब्राह्मणाभ्यामित्यर्थः॥दक्षिणाचविप्रगुणानुरोधेनविषमापिदेया
एकपंक्त्युपविष्टानांविप्राणांश्राद्धकर्मणि॥नस्यान्नोन्यंसमंदेयंदक्षिणात्वनुसारतइतिस्मृतेः॥द
क्षिणांदत्वास्वधांवाचयिष्येइत्युक्त्वातैर्ब्राह्मणैर्वाच्यतामितिवदेत्॥प्रीयंतांविश्वेदेवाइतिविप्रैरुक्ते
दातारइतिमंत्रंजपेत्॥पितृणांन्युब्जंपात्रमुत्तानंकृत्वावाजेवाजइतिमंत्रेणपितृपूर्वंविसर्जयेत्॥

श्रा॰म॰ ६९ नदेतत्सर्वमाह याज्ञवल्क्यः॥ दत्त्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत्॥ वाच्यतामित्यनुज्ञातः प्रकृते
भ्यः स्वधोच्यतां॥ ब्रूयुरस्तु स्वधेति दक्षिणां शक्त्या स्वधाकारमुदाहरेत्॥ वाच्यतामित्युक्ते धेनुकेन्द्रमो सिंचे
त्ततो जलं॥ विश्वेदेवाश्च प्रीयंतां विप्रैश्चोक्त इदं जपेत्॥ दातारो नोऽभिवर्द्धंतां वेदाः संततिरेव च॥ श्रद्धा
च नो मा व्यगमद्बहु देयं च नोऽस्त्विति॥ इत्युक्त्वोक्त्वा प्रिया वाचः प्रणिपत्य विसर्जयेत्॥ वाजे वाज इति
प्रीतः पितृपूर्वं विसर्जनं॥ यस्मिंस्ते संस्रवाः पूर्वं पितृपात्रे निवेशिताः पितृपात्रं तदुत्तानं कृत्वा विप्रान्
विसर्जयेत्॥ इति पिंडप्रतिपत्तिमाह स एव॥ पिंडांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा॥ पत्न्या पुत्रका
मतायां तु वायुपुराणे पत्न्यै प्रजार्थिन्यै दद्यात्तु मध्यमं मंत्रपूर्वकमिति॥ मंत्रस्तु मत्स्यपुराणे॥ आधत्त
पितरो गर्भमिमं त्र संतानवर्द्धन इति वर्द्धमपिंडप्राशनं च केचन काम्यमेव नित्यमिति हेतुनिर्णयिताग्न
चरणाः॥ इतरात्पिंडद्वयं कामनाभावे त्रयमपि गवादिभ्यः प्रतिपाद्यं॥ हृदयस्मृतिः॥ अन्यदेशगता पत्नी
गर्भिणी रोगिणी तथा॥ तदा तं जीर्णवृषभश्छागो वा तं कुमर्दति॥ तीर्थश्राद्धे प्रतिपत्त्यंतरं॥ विष्णु रा॰म॰ ६९

धर्मोत्तरे॥ तीर्थश्राद्धे सदा पिंडान्क्षिपेत्तीर्थे समाहितः॥ दक्षिणाभिमुखो नत्वा पित्र्यादिकात्प्रकीर्त्ति
तेति॥ उच्छिष्टमार्जने विशेषमाह याज्ञवल्क्यः॥ तत्सु विप्रेषु सर्वेषु द्विजोच्छिष्टं न मार्जयेदिति॥ सन्नि
तिष्ठपरास्तं तोषलक्षणार्थं॥ नत्यवर्गहितो नुक्केकल्मषं स्वर्गे न जैः॥ आसायं श्राद्धकार्यं॥
द्विजोच्छिष्टं न मार्जयेदिति प्रचेतो वचनात्॥ मात्स्ये॥ ततश्च वैश्वदेवांते सभृत्यः सह बांधवः॥ भुंजी
तातिथिसंयुक्तः सर्वं पितृनिषेवितमिति॥ श्राद्धशेषस्तोऽन्नं दिवैव कार्यमित्याह जातूकर्ण्यः॥
अहन्येव तु नाकर्त्तव्यं कृते श्राद्धे द्विजन्मनि॥ अन्यथा त्वासुरं श्राद्धं परपाकं च सेवते॥ देवलः॥ श्राद्धे
कृत्वा तु यो सर्वेन भुंक्ते यक कदाचन॥ देवा हव्यं न गृह्णंति कव्यानि पितरस्तथा॥ तद्दिने नित्योपवासप्र
सक्तौ तु श्राद्धशेषं घ्राणमेवेत्युक्तं समयमयूखे॥ अथ श्राद्धप्रयोगः॥ ततः कर्त्ता पूर्वेद्युः सद्यो वाचम्य
प्राणानायम्य मासपक्षाद्युल्लिख्य प्राचीनावीति सव्यं जान्वाच्यास्मत्पितृपितामहप्रपितामहप्रपि
तामहानां॥ मातामहप्रमातामहवृद्धप्रमातामहानां चामुकशर्मणाममुकगोत्राणां वसुरुद्रादित्य

रूपेणं सपत्नीकानां सदेवं सपिंडं वा पार्वणविधिना श्वो द्य वा दर्शश्राद्धमहं करिष्य इति संकल्पमेतान्
यादेः पत्नीकानां पित्रादीनामेवं ॥ महालये तु यथासंभवं सर्वेषामिति विशेषः ॥ ततः कर्त्ता दक्षिणं जा
न्वाच्योपवीती कृतदर्भमुखोऽस्मत्पित्रादीनां दर्शश्राद्धार्थे विश्वेदेवेस्थाने त्वामहं निमंत्रयेऽस्मेकं दैवे चतुरो
वा प्राङ्मुखान्ब्राह्मणान्प्रत्येकं दक्षिणं जानुं स्पृष्ट्वा निमंत्र्य दैवे क्षणः क्रियतामिति ब्रूयात् ॥ ॐ तथे
ति तरः प्रतिब्रूयात् ॥ कर्त्ता प्राप्नोतु भवानिति ब्रूयात् ॥ प्राप्नवानीतितरः ॥ ततः कर्त्ता दक्षिणामुखः सव्यं
दक्षिणं वा जान्वाच्य प्राचीनावीत्यस्मिन् दर्शश्राद्धे वस्मत्पितुरमुकशर्मणोऽमुकगोत्रस्य वसुरूपस्य
सपत्नीकस्य स्थाने त्वामहं निमंत्रयेऽस्तु दर्भमुखमेकं वा नव वा ब्राह्मणान्प्रत्येकं सव्यं दक्षिणं जानुं स्पृ
ष्ट्वा निमंत्रयेत् ॥ एवं पितामहस्यामुकस्य रुद्ररूपस्य ॥ प्रपितामहस्यादित्यरूपस्येति ॥ एवमेव मातामहादीना
